दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-12 ■ वर्ष-5 ■ अङ्क-312 | 1 | सितम्बर 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णचतुर्थी
भाद्रपद 16 प्रविष्ठांशः मङ्गलमयः भवेत्

2 राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः निफ़्ट्-छात्रान् देशस्य समृद्ध-सांस्कृतिक-न्यासे संलग्नाः सन्तः वैश्विक दृष्टिकोणम् अङ्गीकर्तुम् आह्वयत्

4 राज्यस्तरीयसंस्कृतप्रतियोगितासु डोहगी-महाविद्यालयस्य उत्कृष्टप्रदर्शनम्

9 संस्कृत सप्ताहोपलक्ष्ये आयोजिता "संस्कृतभाषायाः संरक्षण-संवर्धनस्य वर्तमानसमये आवश्यकता" इति राष्ट्रिय-ई-सङ्गोष्ठीसङ्गोष्ठी सम्पन्ना

## प्रधानमन्त्रिणा मोदिना ईरान-देशस्य राष्ट्रपतिना मसूद-पेजश्कियानेन सह द्विपक्षीय वार्ता सम्पादिता






हिमसंस्कृतवार्ता। बिश्केक-नगरे किर्गिस्तान् देशस्य राष्ट्रपतिना सादिर् जापारोव् इत्यनेन सह प्रधानमन्त्रिणः नरेन्द्रमोदिनः उपवेशनमभवत्। अवधेयं यत् प्रधानमन्त्री किर्गिस्तान् देशस्य द्विदिवसीययात्रायाम् अस्ति। इतः पूर्वम्, बिश्केक्-नगरे आयोजिते एस्.सी.ओ. शिखरसम्मेलने इरानदेशस्य राष्ट्रपतिना सह प्रधानमन्त्रिणा श्रीमोदिना द्वैपाक्षिकोपवेशनं कृतम्। उभौ नेतारौ द्वैपाक्षिकसम्बन्धानां विविधपक्षाणां विषये चर्चितवन्तौ। तौ पश्चिम एशिया-क्षेत्रे सद्यः एव कृतानां विकासानां समीक्षाम् अकुर्वताम्। सर्वे विषयाः संवादस्य कूटनीतेः च माध्यमेन समापनीयाः इति भारतस्य स्थिरस्थितिः प्रधानमन्त्रिणा पुनः प्रतिपादिता। अस्मिन् क्षेत्रे शान्ति स्थिरतां च सुनिश्चेतुं, नौपरिवहनस्य वाणिज्यस्य च स्वतन्त्रतायाः रक्षणाय च निरन्तरप्रयासानाम् आवश्यकता प्रधानमन्त्रिणा श्रीमोदिना अधोरेखिता। पूर्वं प्रधानमन्त्री मोदी बिश्केक्-नगरे आर्मेनिया-देशस्य प्रधानमन्त्रिणा निकोल् पाशिनयान् इत्यनेन सह मिलितवान्। उभाभ्यां नेतृभ्यां रक्षा, आर्थिकं, औषधनिर्माणं, विज्ञानं तथा प्रौद्योगिकी, संस्कृतिः, शिक्षा इत्यादिषु विविधक्षेत्रेषु द्वैपाक्षिकसहकरणं सुदृढं कर्तुं उपायाः चर्चिताः। तौ पश्चिम एशियायाः स्थितिं समेत्य क्षेत्रीय-वैश्विक विकासविषये अपि विचाराणाम् आदानप्रदानम् अकुर्वताम्। कज़ाकिस्तान् देशस्य राजधान्यां भारतीयसमुदायस्य सदस्यैः सह प्रधानमन्त्री नेहपूर्वकं वार्तालापम् अकरोत्। बिश्केक्-नगरस्य महात्मागान्धी-स्मारके अपि श्रीमोदी पुष्पांजलिम् अर्पितवान्। अद्य सः विश्केक्-नगरे शङ्घाई-सहकार-सङ्घटनस्य षड्विंशतितमं शिखरसम्मेलनं सम्बोधयिष्यति।

## सर्वकारेण एक-दशमलव-सप्तविंशतिलक्ष-कोटि-रूप्यकाणां परिव्ययेन सेमिकॉन् इण्डिया कार्यक्रमस्य द्वि-दशमलव-शून्यस्य षट्-स्तम्भाः अधिसूचिताः

देशे चिपेति-निर्माण-पारिस्थितिकी तन्त्रस्य सुदृढीकरणाय सर्वकारेण एक दशमलव-सप्तविंशति-लक्षकोटि-रूप्यकाणां परिव्ययेन सेमिकॉन् द्वि-दशमलव शून्यं योजना अधिसूचिता। नवदेहल्याम् वार्ताहर-सम्मेलनं सम्बोधयन् केन्द्रीय इलेक्ट्रॉनिक्स-सूचना-प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः अवदत् यत् अनेन उपक्रमेण आगामि-वर्षेषु वैश्विक अर्धचालक-उद्योगस्य विपणौ भारतस्य सहभागिता प्रायः दश-प्रतिशतं यावत् भवितुमर्हति, अथ च देशः वैश्विक अर्धचालक-मूल्य-शृङ्खलायां महतीं भूमिकां निर्वक्ष्यति। श्रीवैष्णवः न्यवेदयत् यत् वेफर्-निर्माणतःआरभ्य चिप-उत्पादनं यावत् भारतं वैश्विक



अर्धचालक -मूल्य-शृङ्खलायां दृढतया स्थापयितुं सर्वकारस्य मुख्यं लक्ष्यं वर्तते। अस्य कार्यक्रमस्य षट् स्तम्भानाम् अधिसूचना प्रकाशयता श्रीवैष्णवेन प्रतिपादितं यत् आगामि-दशकेषु बृहत्-निवेशार्थं भारतम् एव सर्वथा उपयुक्तं गन्तव्य-स्थानम् अस्ति इति वैश्विक अर्धचालक-हितधारकाणां विश्वासः वर्तते।

## भारतीय-क्रीडकेन अङ्कुर-भट्टाचार्य इत्यनेन चेक-गणराज्ये डब्ल्यूटीटी फीडर् ओलोमौक-स्पर्धायां प्रथमं पुरुष एकल-विजेतृ-पदम् अर्जितम्

भारतीयः टेबल-टेनिस-क्रीडकः अंकुर भट्टाचार्जी इत्येषः चेक-रिपब्लिक इत्यत्र डब्ल्यूटीटी फीडर् ओलोमौक-स्पर्धायां **स्वस्य प्रथमं डब्ल्यूटीटी-पुरुषैकल-उपाधिं विजितवान्।**



## अद्यतनीयं सुभाषितम्

**आयाच्चतुर्थभागेन, व्यय कर्म प्रवर्तयेत्।**
**अन्यूनतैलदीपोऽपि,चिरं भद्राणि पश्यति।।**

भावार्थः- कुल आय के एक चौथाई भाग को अपनी प्रमुख आवश्यकताओं को पूरा करने में व्यय करना चाहिए। अन्य छोटी घरेलू आवश्यकताओं जैसे घर में प्रकाश करने के लिए तैल और दीपक की व्यवस्था आदि के लिए भी कम व्यय करने वाला व्यक्ति चिर काल तक सम्पन्न और सुखी रहता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## भारतीय-नौसेनया आईएनएस निपुण इति पोतः नौसेनायां सम्मेलितः



भारतीय नौसेनया मुम्बई-नगरस्थे नौसेना-गोदी-प्राङ्गणे निस्तार-वर्गस्य द्वितीयः निमज्जन-सहायक-पोतः आईएनएस निपुण विधिवत् नौसेनायां सम्मेलितः। समारोहं सम्बोधयन् नौसेना प्रमुखः एडमिरल कृष्ण-स्वामीनाथन् अवदत् यत् रणनीतिक-परिवर्तनस्य अस्मिन् समये, समुद्रे बहुक्षेत्रीय-गम्भीर-जल-अभियानेभ्यः नौसेनायाः विशिष्ट-अन्तर्जलीय-क्षमतासु निपुण इति पोतः एकं सशक्तं संयोजनं भविष्यति। विशाखापत्तनम स्थितया हिन्दुस्तान शिपयार्ड लिमिटेड इत्यनया संस्थया स्वदेशी-ज्ञानेन परिकल्पितः निर्मितश्च निपुणपोतः निमज्जनस्य अथ च अन्तर्जलीय-अभियानानां विविधानां आवश्यकतानां पूरणाय विशेषतया निर्मितः । अयं पोतः आधुनिक-निमज्जन-प्रणालीभिः अन्तर्जलीय-हस्तक्षेप-सामर्थ्यैश्च सज्जः अस्ति, येन समुद्रे कठिन परिस्थितिषु कार्यरतानां निमज्जकानां कृते निरन्तरं साहाय्यं सम्भविष्यति। पोते नौपरिवहनस्य, मज्ञ प्रबन्धनस्य अत्याधुनिक-प्रणालीभिः सह निमज्जनाय, अन्तर्जलीय-कार्याय, चिकित्सा-साहायतायै च विशिष्टाः सुविधाः अन्तर्भूताः सन्ति।

# राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः निफ़्ट्-छात्रान् देशस्य समृद्ध-सांस्कृतिक-न्यासे संलग्नाः सन्तः वैश्विक दृष्टिकोणम् अङ्गीकर्तुम् आह्वयत्

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः अवदत् यत् वस्त्र परिधान-क्षेत्रं न केवलं भारतस्य सांस्कृतिक-न्यासस्य महत्त्वपूर्णः भागः अपि तु इदं कोटिशः जनानाम् आजीविकायाः प्रमुखः आधारः अपि वर्तते। राष्ट्रिय-फैशन-प्रौद्योगिकी संस्थानस्य दीक्षान्त समारोहं सम्बोधयन्ती राष्ट्रपतिः छात्रान् अभ्यर्थितवती यत् ते देशस्य समृद्ध-सांस्कृतिक-मूल्येषु संलग्नाः सन्तः वैश्विक दृष्टिकोणम् अङ्गीकुर्वन्तु। फैशन-उद्योगे महिलानां वर्धमानं योगदानं रेखाङ्कयन्ती राष्ट्रपतिः न्यवेदयत् यत् कार्यक्रमे उपस्थितेषु प्रायः चतुःसहस्र-छात्रेषु पञ्चाशीति-प्रतिशतन्मिताः महिलाः सन्ति। सा अकथयत् यत् वस्त्र-प्रौद्योगिकी-क्षेत्रे वैश्विक उपस्थितेः विस्ताराय भारते असीम-सम्भावनाः वर्तन्ते। राष्ट्रपतिः छात्रान् आह्वयत् यत् ते स्व-ज्ञानस्य, कौशलस्य, सृजनशीलतायाश्च उपयोगेन देशस्य पारम्परिक वस्त्र-परम्परां समकालिक-विपणिभिः नूतन-प्रौद्योगिकीभिः च सह योजयन्तु। सप्तचत्त्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसित भारतस्य सङ्कल्प-पूर्तये युवकानां योगदानम् अधिकृत्य राष्ट्रपतिः अवदत् यत् छात्राः केवलम् उद्योगान्वेषकाः न भवेयुः, अपि तु उद्योग-प्रदातारः भूत्वा अन्येभ्यः अपि वृत्त्यवसरान् सृजेयुः।



राष्ट्रपतिः मुर्मुः असूचयत् यत् विगत-चतुर्षु दशकेषु निफ़्ट् इत्यस्य छात्रैः विशेषज्ञैश्च राष्ट्रियान्ताराष्ट्रिय स्तरे महत्त्वपूर्णाः उपलब्धयः अर्जिताः, येन भारतस्य प्रतिष्ठा प्रवर्धिता। अत्रावसरे केन्द्रीय-वस्त्रमन्त्री गिरिराज सिंहः अवदत् यत् अष्टोत्तरद्विसहस्रतमे वर्षे तत्कालीनः राष्ट्रपतिः डॉ.ए.पी.जे. अब्दुल कलामः निफ़्ट्-दीक्षान्त-भाषणं दत्तवान्। अष्टादश-वर्षेभ्यः परं पुनः राष्ट्रपतिः द्रौपदी मुर्मुः छात्रेभ्यः शुभाशीर्वादं प्रदत्तवती। सः अकथयत् यत् अद्य प्रायः चतुस्सहस्रं छात्राः उपाधिपत्राणि प्राप्तवन्तः।

# १ सितम्बर-दिनाङ्कतः नवदशसु मण्डलेषु प्रवर्तयिष्यते अङ्कीया उर्वरकविक्रयव्यवस्था- विजयकुमारसिन्हा





हिमसंस्कृतवार्ता:- राघव नाथ झा, पाटलिपुत्रम्।

कृषकेभ्यः गुणवत्तयोपेतानाम् उर्वरकाणां समये उपलब्धिं निश्चेतुं विक्रयव्यवस्थायां च पारदर्शकताम् आनेतुं बिहारराज्ये अङ्कीया उर्वरकविक्रयप्रणाली प्रवर्तयिष्यते। कृषिमन्त्री विजयकुमारसिन्हा सोमवासरे मीठापुरस्थे कृषिभवने आयोजिते 'क्षेत्रं रक्षत, गुणयुक्तं बीजम् उर्वरकं च सुलभं कुरुत' इति प्रशिक्षणकार्यक्रमे उद्घाटनभाषणं कुर्वन् न्यवेदयत् यत् अनया नूतनव्यवस्थया उर्वरक- क्रयविक्रयप्रक्रिया अधिका पारदर्शिनी, उत्तरदायिनी, कृषककेन्द्रिता च भविष्यति। सः असूचयत् यत् FSAS (Framework for Fertilizer Sale Application System) इति माध्यमेन विकसिता अङ्कीयव्यवस्था iFMS तथा AgriStack इत्येताभ्यां सह संयोजिता अस्ति। कृषकाः स्वकीयेन 'Farmer ID' इति सङ्केतेन अथवा FSAS-पञ्जीकरणेन उर्वरकं प्राप्तुं शक्ष्यन्ति। क्षेत्रस्य खाता-खेसरा-सङ्ख्यां, क्षेत्रफलम्, उपजीव्यसस्यविवरणं च प्रविश्य ICAR-संस्थायाः अनुशंसामनुसृत्य उर्वरकस्यावश्यकतायाः आकलनं भविष्यति, त्रिदिनात्मकमान्यतया युक्तः 'QR Code' इति सङ्केतः च निर्गमिष्यते। अनेनैव सङ्केतेन अधिकृतविक्रेतृभ्यः उर्वरकक्रयणं सम्भविष्यति। कृषिमन्त्रिणा स्पष्टीकृतं यत् अस्याः व्यवस्थायाः प्रायोगिकपरीक्षणं वैशाली-शेखपुरामण्डलयोः सफलं जातम्। सम्प्रति १ सितम्बर-दिनाङ्कतः राज्यस्य नवदशसु मण्डलेषु, २ अक्टूबर- दिनाङ्कतः च सम्पूर्णे बिहारराज्ये इयम् अङ्कीया उर्वरकविक्रयप्रणाली प्रवर्तिष्यते। अनेन उर्वरकस्य सञ्चयस्य, वितरणस्य, विक्रयस्य च प्रभावशालिनी दृष्टिः सम्भविष्यति, अपविक्रयस्य सङ्ग्रहवृत्तेश्च उपरि नियन्त्रणं स्थास्यति।सः अधिकारिभ्यः निर्देशम् अयच्छत् यत् सर्वेभ्यः उर्वरकविक्रेतृभ्यः अस्याः नूतनव्यवस्थायाः प्रशिक्षणं दीयताम्, कृषकेभ्यश्च Farmer ID, FSAS-पञ्जीकरणे, उर्वरकप्राप्तौ च सर्वप्रकारकं साहाय्यं प्रदीयताम्। एतेन सह क्षेत्रस्तरे नियमितपरीक्षणं कृत्वा एतदपि निश्चेतव्यं यत् कृषकाः निर्धारितमूल्ये विनैव काठिन्येन गुणयुक्तम् उर्वरकं प्राप्नुयुः।

विजयकुमारसिन्हा अवदत् यत् अङ्कीयव्यवस्थायाः उद्देश्यं केवलं तान्त्रिकपरिवर्तनं नास्ति, अपि तु कृषकाणां हिताय प्रशासनिकः परिष्कारः अस्ति। तन्त्रज्ञानस्य उपयोगः कृषकाणां सौकर्यं वर्धयितुं भवेत्, तेषां काठिन्यं वर्धयितुं न।

# नेपाल-देशे विनाशकारि-जलप्लवानन्तरम् आपदुद्धरण-कार्याणि तीव्रीभूतानि, मृतानां संख्या त्र्यधिकनवशतं सम्प्राप्ता, चतुस्सहस्राधिकाः जनाः अधुनापि विलुप्ताः

नेपालदेशे गतसप्ताहे विनाशकारि-जलाप्लावेन, मृत्तिका-स्खलनेन च मृतानां सङ्ख्या त्र्यधिकनवशतं यावत् वर्धिता, प्रायः सपादचतुःसहस्रतोऽप्यधिकाः जनाः विलुप्ताः एव सन्ति। नेपाल-देशस्य राष्ट्रिय-आपद्-सङ्कट-न्यूनीकरण-प्रबन्धन-प्राधिकरणस्य अनुसारं रविवासरात् एषा सङ्ख्या वर्धिता अस्ति। नेपालदेशस्य अष्टप्रभावितमण्डलेभ्यः शवाः प्राप्ताः रक्षकाः लुप्तान् अन्वेष्टुं, रक्षयितुं च लग्नाः सन्ति। अत्रान्तरे, प्रायः विभिन्नासु जलविद्युत् परियोजनासु न्यूनातिन्यूनं त्रयस्त्रिंशदुत्तरनवशतं यावत् कर्मकराः बाधिताः इति मन्यते। तिब्बत-क्षेत्रे सम्प्रति मृतकानां सङ्ख्या षोडश अस्ति, षड् चत्वारिंशदुत्तरपञ्चशतं यावत् जनाः लुप्ताः सन्ति इति उच्यते। अनया आपदया नेपाल-तिब्बत-सीमायां स्थितेषु नगरेषु ग्रामेषु च हिमस्य, शिलायाः, मृत्तिकायाः, भग्नावशेषस्य च प्रवाहः आगतः। नेपाली-प्रधानमन्त्री बालेन्द्रशाहः जलाप्लावनं "अभूतपूर्वं विनाशकरं च प्राकृतिक आपत्" इति उक्तवान्, यत्र प्रायः एकविंशति सहस्रं यावत् सुरक्षा-कर्मचारिणः उद्धारकार्ये संलग्नाः आसन्। रेड्क्रास्-संस्थायाः अनुसारं नवति सहस्रतोऽप्यधिकाः जनाः प्रभाविताः इति अनुमानम् अस्ति, यदा तु अधिकारिणः शवानाम् अन्वेषणम्, अभिज्ञानम् च निरन्तरं कुर्वन्तः सन्ति।

# बिहार-झारखण्डराज्ययोः मध्ये विगतषड्विंशतिवर्षेभ्यः सोननदीजलविवादः समाप्तः

हिमसंस्कृतवार्ता:- डॉ विमलेश झा

बिहार-झारखण्डराज्ययोः मध्ये सोननद्याः जलविभाजनं प्रति विगत षड्विंशतिवर्षेभ्यः प्रचलितः विवादः अन्ततः समाप्तः जातः। नवदिल्ल्यां केन्द्रीयगृहमन्त्रिणः श्री अमितशाहस्य अध्यक्षतायाम् आयोजितायां महत्त्वपूर्णायां सभायां उभयोः राज्ययोः मध्ये अस्मिन् विषये सहमतिः अभवत्। एतत् समाधानं बिहारस्य कृषकाणां कृषिविकासस्य च दृष्ट्या ऐतिहासिकं महत्त्वपूर्णं च मन्यते। बिहारस्य मुख्यमन्त्री श्रीसम्राटचौधरी सामाजिकमाध्यमेन अस्याः ऐतिहासिकसहमत्याः सूचनां प्रदत्तवान्। तेन उक्तं यत् नवदिल्ल्यां केन्द्रीयगृहमन्त्रिणः श्रीअमितशाहस्य नेतृत्वे सम्पन्नायां सभायां केन्द्रीयजलशक्तिमन्त्री श्रीसी.आर.पाटिलः, झारखण्डस्य मुख्यमन्त्री श्रीहेमन्तसोरेनः च उपस्थिताः आसन्। तत्रैव सोननद्याः जलविभाजनसम्बद्धस्य दीर्घकालिकस्य विवादस्य समाधानार्थं सहमतिः प्राप्ता। अनेन निर्णयेन बिहारस्य कृषकाणां कृते सिञ्चनार्थं जलस्य उपलब्धता वर्धिष्यते इति अपेक्षा अस्ति। जलस्य समुचितव्यवस्थया कृषिक्षेत्रे सकारात्मकः प्रभावः भविष्यति तथा कृषकाणां सिञ्चनसुविधा अपि सुदृढा भविष्यति।

# मुकेश-अग्निहोत्री अवदत्- मन्दिराणां धनेन निर्धनानां

## चिकित्सायै विद्यालय-शुल्काय च साहाय्यं करिष्यति सर्वकारः



**हिमसंस्कृतवार्ताः- शिमला।**
शक्तिपीठेषु बृहत्सु मन्दिरेषु च समर्पण-रूपेण सञ्चितायाः राशेः उपयोगः अधुना निर्धनानां चिकित्सायै निर्धन-छात्राय विद्यालय- शुल्क- प्रदानाय च कर्तुं शक्यते। सम्बद्ध-मण्डलानाम् उप-आयुक्ताः स्वक्षेत्रस्य योग्यानां निर्धन- परिवाराणां साहाय्यार्थम् अस्याः राशेः उपयोगं कर्तुं शक्ष्यन्ति। मन्दिराणां समर्पणराशेः उपयोगं सन्दर्भ्य न्यायालयस्य निर्णयात् परं राज्यसर्वकारेण विधिविभागात् परामर्शः याचितः आसीत्। विधिविभागेन सर्वकाराय प्रदत्ते प्रतिवेदने स्पष्टीकृतं यत् मन्दिरेषु उपलब्धायाः समर्पणराशेः उपयोगेन दीनानां चिकित्सायै, निर्धन-परिवाराणां बालकानां च विद्यालय-शुल्काय साहाय्यं कर्तुं शक्यते।तथापि न्यायालयेन मन्दिराणां धनस्य विज्ञापनेषु प्रयोगे, मन्दिर-न्यासस्य अधिकारिणां कृते वाहनानां क्रयणे च प्रतिबन्धः आरोपितः। एषा सूचना उप-मुख्यमन्त्रिणा मुकेश अग्निहोत्रिणा विधानसभायां प्रदत्ता। सः श्रीचिन्तपूर्णीक्षेत्रस्य विधायकस्य सुदर्शनबबलू महोदयस्य पक्षतः शून्यकाले उत्थापितस्य विषयस्य प्रत्युत्तरं यच्छन् आसीत्। उपमुख्यमन्त्री अवदत् यत् मन्दिरेषु भक्तैः समर्पितायाः राशेः उपयोगः जनहिताय निर्धनजनानां साहाय्यार्थं च करणीयः, सर्वकारश्च अस्यां दिशि वैधानिक-प्रावधानानाम् अन्तर्गतं पदं स्वीकरिष्यति। मुकेश-अग्निहोत्री प्रोक्तवान् यत् सर्वकारः अस्मिन् विषये उच्चन्यायालयस्य समक्षं पुनर्विचारयाचिकां प्रस्तोष्यति। सर्वकारः न्यायालयस्य निर्देशस्य विधिविभागस्य च प्रतिवेदनस्य अध्ययनं कृत्वा अग्रे वैधानिककार्याणि विधास्यति।

### यूकेलिप्टस (सफेदा) वृक्षेषु प्रतिवृक्षं ९० रूप्यकाणि, ट्रक-वाहने च ५०० रूप्यकाणि शुल्कम्

ऊनाक्षेत्रस्य विधायकः सतपालसिंहसत्ती शून्यकाले 'सफेदा' तथा 'पापुलर' वृक्ष-कृषिकर्तॄणां कृषकाणां विषयम् उत्थापितवान्। सः अवदत् यत् सफेदावृक्षस्य एकस्मिन् वृक्षे सर्वकारेण ९० रूप्यकाणि शुल्कम् आरोपितम्। काष्ठं निकृत्य विक्रयणार्थं नयने प्रति-ट्रक ५०० रूप्यकाणि शुल्कम् अपि गृह्यते। वृक्ष-कर्तनस्य अनुज्ञा- प्रक्रियायाः जटिलतायाः कारणात् कृषकाणाम् एक-ट्रक-काष्ठे व्ययः प्रायः ३००० रूप्यकाणि यावत् सम्प्राप्तः। सः कृषकाणां हिताय वृक्ष-कर्तनप्रक्रियां सरलां कर्तुं याचनाम् अकरोत्।

# एकस्मिन्नेव जलकुण्डे द्वयोः विभागयोः अधिकारः, मुख्यमन्त्रिमहोदयेन दत्ताः अन्वेषणस्य निर्देशाः



**हिमसंस्कृतवार्ताः- शिमला।** विधानसभायां प्रश्नोत्तरकाले चौपालक्षेत्रस्य विधायकेन बलबीरसिंहवर्मणा मुख्यमन्त्रिमहोदयाय एकः परामर्शः दत्तः यत् पञ्चायतेषु बह्वीभिः योजनाभिः एक-प्रकारकाणि एव कार्याणि क्रियन्ते। जलकुण्ड-निर्माणस्य कार्यं 'जलजीवन-अभियानम्' अपि करोति, 'जाइका' (JICA) अपि करोति, विधायक-सांसद-निधिभ्याम् अपि क्रियते। अतः अभिलेख-पञ्जीकरण-काले सर्वकारेण सुनिश्चितं करणीयं यत् मापन-पुस्तकेन सह एतादृशानां कार्याणां चत्वारि चित्राणि अपि अवश्यं योजनीयानि, येन जनाः पश्चात् अस्य विषये ज्ञातुं शक्नुयुः। प्रत्युत्तरे मुख्यमन्त्री पारदर्शिकतायाः समर्थनं कुर्वन् अवदत् यत् यदि भवतः निर्वाचनक्षेत्रस्य कस्याञ्चित् पञ्चायते किमपि अनुचितं जातं तर्हि भवन्तः विशिष्टां सूचनां दद्युः।
यद्यपि विधायकः बलबीरवर्मा विशिष्टसूचनां न दत्तवान्, किन्तु अनुपूरकप्रश्ने काङ्ग्रेस-विधायकः विनोदसुल्तानपुरी स्व-निर्वाचन-क्षेत्रस्य 'कोटबेजा' तथा 'दयोठी' इति पञ्चायतयोः एकस्मिन् जलकुण्डे द्वयोः विभागयोः अधिकार-दावस्य विषयम् उत्थापितवान्। सः अवदत् यत् एतादृशाः जलकुण्डाणि निर्मिताणि सन्ति, येषु जलजीवन- अभियानं 'जाइका' च उभौ स्व-स्वामित्वं प्रतिपादयतः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः तत्क्षणमेव सदने अस्य प्रकरणस्य अन्वेषणस्य निर्देशान् अयच्छत्, प्रोक्तवांश्च यत् अन्वेषण- प्रतिवेदनं सदने अपि उपस्थापयिष्यते।

# सेवा-पात्रतां पूर्णां कृतवन्तः पञ्चायत-सेवादाराः नियमित-कर्मचारिणः भविष्यन्ति, मानदेयेऽपि कृता वृद्धिः -मुख्यमन्त्री सुक्खुः

**हिमसंस्कृतवार्ता — शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रोक्तवान् यत् राज्य-सर्वकारेण सेवा-पात्रतां पूर्णां कृतवन्तः पञ्चायत-सेवादाराः नियमितीकर्तुं निर्णयः स्वीकृतः। सोमवासरे शिमलायाः 'चौड़ा-मैदान'-स्थले पञ्चायत-चौकीदार-सङ्घस्य पक्षतः आयोजिते सम्मेलने सम्बोधनं कुर्वन् मुख्यमन्त्री एतां वार्ताम् अवदत्। सः न्यवेदयत् यत् सर्वकारेण अस्मिन् वित्त-वर्षे आय-व्ययक-पत्रे पञ्चायत-सेवकानां मानदेय-वृद्धेः निर्णयः कृतः आसीत्। अधुना तेभ्यः ५०० रूप्यकाणां वृद्ध्या सह प्रति-मासं नव-सहस्र-रूप्यकाणि (९,०००) मानदेयं दीयते। मुख्यमन्त्रिणा प्रोक्तं यत् वर्तमान-सर्वकारेण भ्रष्टाचारस्य गुप्त-द्वाराणि पिधाय त्रि-सहस्र-कोटि-रूप्यकाणां (३,००० कोटि) बचतं विहितम्। जलविद्युत्-परियोजनासु हिमाचलस्य न्यायोचित-अधिकारम् उल्लिखन् सः अवदत् यत् प्रदेशः स्व-सम्पदां स्व-अधिकार-क्षेत्रे आनीय आत्मनिर्भरतायाः दिशि अग्रे सरति। सः स्पष्टीकृतवान् यत् कर्मचारिभ्यः पुरातन-निवृत्तिवेतन-योजनायाः (OPS) प्रदानाय सर्वकारस्य निर्णयः राजनीतिकः नासीत्, अपि तु सामाजिक-दृष्टिकोणात् स्वीकृतः आसीत्। मुख्यमन्त्री आरोपम् अकरोत् यत् भाजप-दलं पुरातन-निवृत्तिवेतन-योजनां स्थगयितुं यत्नं कुर्वद् अस्ति।



### ग्रामीण-अर्थव्यवस्थायाः संवर्धनाय उपायाः

मुख्यमन्त्री अवदत् यत् ग्रामीण-अर्थव्यवस्थां सुदृढां विधातुं सर्वकारेण बहवः उपायाः क्रियन्ते। प्रदेशे प्राकृतिक-कृषेः प्रोत्साहनं दीयते। प्राकृतिक-कृष्या उत्पादितेभ्यः गोधूमेभ्यः प्रति-किलोग्रामं ८० रूप्यकाणि, मक्का-शस्याय ५० रूप्यकाणि तथा च अपक्वहरिद्रायाः कृते १५० रूप्यकाणि समर्थन-मूल्यं दीयते। एतदतिरिक्तं धेनोः दुग्धे प्रति-सेटकं ६१ रूप्यकाणि तथा च महिष्याः दुग्धे ७१ रूप्यकाणि समर्थन-मूल्यं निर्धारितम् अस्ति।
अस्मिन् सम्मेलने 'इण्टक' (INTUC) संस्थायाः उपाध्यक्षः पूर्णचन्दः तथा पञ्चायत-चौकीदार-सङ्घस्य (इण्टक) राज्याध्यक्षः प्रेमवर्धनः अपि स्व-विचारान् प्राकटयताम्। अस्मिन् अवसरे ग्रामीण-विकास-पञ्चायतीराज-मन्त्री अनिरुद्धसिंहः वरिष्ठ-अधिकारिणश्च उपस्थिताः आसन्।



# WEATHER UPDATE - काङ्गड़ा-मण्डले द्वे गृहे धराशायिनी, त्रयः जनाः मलिनावशेषे निमग्नाः; सप्तसु मण्डलेषु तीव्र-वृष्टेः पूर्व-सूचना

हिमसंस्कृतवार्ता — काङ्गड़ा/शिमला।
हिमाचलप्रदेशे वर्षर्तु-सक्रियता पुनरेकवारं जनानां कष्टानि अवर्धयत्। धारासारेण वर्षणेन सह सोमवासरे काङ्गड़ा-मण्डले द्वे गृहे पतिते। डरोह-क्षेत्रस्य बोदा-ग्रामे मृत्तिकानिर्मितस्य गृहस्य भित्ति-पतनेन परिवारस्य त्रयः सदस्याः मलिनावशेषे निमग्नाः संजाताः, ये महता प्र यासेन निष्कास्य टाण्डा-आयुर्विज्ञान-महाविद्यालये (TMC) उपचाराय प्रविष्टाः कृताः। तत्रैव पुरातन-काङ्गड़ा-क्षेत्रे एकं द्वि-तलीयगृहं पूर्णतया भूमिसात् जातम्। शाहपुरस्य प्रेई-पञ्चायते अपि त्रयाणां गृहाणां भित्तीनां रक्षण-प्राचीराणां पतनेन महती हानिः संजाता। अतिवृष्टि-कारणात् बहुषु स्थानेषु जल-भराव-वृक्ष-पतनाभ्यां विद्युत्-व्यवस्था अपि बाधिता अभवत्।
द्वितीये दिने अपि रेलयानानाम् आवागमनं स्थगितम् निरन्तर-वर्षणस्य मध्ये विश्व-धरोहर-कालका-शिमला-रेल-मार्गे सोमवासरे द्वितीये दिनेऽपि रेलयानानाम् आवागमनं स्थगितम् आसीत्। गमनागमनस्य षड् रेलयानानि मङ्गलवासरे अपि न प्रवर्तिष्यन्ते, यदा तु चतुर्णां रेलयानानां सञ्चालनं १३ सितम्बर-पर्यन्तं निरस्तं कृतम्। रेल-विभागेन रेल-मार्गस्य सुरक्षां विचार्य एषः निर्णयः स्वीकृतः।

# राज्यस्तरीयसंस्कृतप्रतियोगितासु डोहगी-महाविद्यालयस्य उत्कृष्टप्रदर्शनम्

## त्रयः विद्यार्थिनः प्रथम-द्वितीयपुरस्कारैः सम्मानिताः, प्राचार्येण कृतं सम्माननम्



डा. मुकेशकुमारः (डोहगी, ऊना) डोहगीस्थस्य सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयस्य विद्यार्थिभिः राज्यस्तरीयासु संस्कृतप्रतियोगितासु उत्कृष्टप्रदर्शनं विधाय महाविद्यालयस्य गौरवं वर्धितं वर्तते। हिमाचलप्रदेशस्य भाषासंस्कृतिविभागस्य सौजन्येन त्रिगर्तसंस्कृतमहाविद्यालये, चामुण्डाजीधाम्नि आयोजितासु राज्यस्तरीयासु प्रतियोगितासु महाविद्यालयस्य विद्यार्थिभिः विविधस्पर्धासु भागम् ऊढ्वा उत्कृष्टाः उपलब्धयः प्राप्ताः।

शास्त्री-तृतीयवर्षस्य छात्रा सोहानी प्रश्नोत्तरी-प्रतियोगितायां प्रथमपुरस्कारं, तमन्ना प्रश्नोत्तरी-प्रतियोगितायां द्वितीयपुरस्कारं, तथा अनुराधा श्लोकोच्चारण-प्रतियोगितायां द्वितीयपुरस्कारं प्राप्तवत्यः। एतदतिरिच्य महाविद्यालयस्य छात्रौ विनायकगर्गः नेहा च भाषणप्रतियोगितायां, राघवशर्मा च श्लोकोच्चारणप्रतियोगितायां उत्कृष्टं प्रदर्शनं कृतवन्तः। विद्यार्थिनां साफल्येन महाविद्यालये हर्षोल्लासस्य वातावरणं वर्तते। राज्यस्तरीयप्रतियोगिताभ्यः प्रत्यागतानां विजेतॄणां सम्माननाय अभिनन्दनाय च महाविद्यालये विशेषः कार्यक्रमः आयोजितः। अस्मिन्नवसरे महाविद्यालयस्य प्राचार्यः प्रो. लालसिंहपठानिया विजेतृविद्यार्थिनां सम्मानं कृतवान्।

प्राचार्यः अकथयत् यत् विद्यार्थिभिः राज्यस्तरीयायां प्रतियोगितायां प्राप्तम् इदं साफल्यं महाविद्यालयस्य गौरवाय वर्तते। सः उक्तवान् यत् निरन्तरं परिश्रमेण अनुशासिता छात्राः आचार्याणां मार्गदर्शनेन निश्चयेन स्वलक्ष्यं प्राप्तुं शक्नुवन्ति। सः अन्यान् विद्यार्थिनः अपि एताभिः उपलब्धिभिः प्रेरणां गृहीत्वा विविधासु प्रतियोगितासु उत्साहपूर्वकं भागं ग्रहीतुं सम्प्रेरितवान्। विद्यार्थिनां मार्गदर्शकेन ज्योतिषविभागस्य आचार्येण डा. मुकेशकुमारशर्मणा अपि विद्यार्थिनां सफलतायै हार्दिकाः शुभकामनाः प्रदत्ताः। अभिनन्दनकार्यक्रमे महाविद्यालयस्य सर्वेऽपि आचार्याः— डा. केदारदत्तपुरोहितः, डा. रविदत्त-शर्मा, डा. राजिन्द्रकुमारशर्मा, डा. कृष्णादेवी, डा. नरेन्द्रकुमारः, श्री रविकन्यालः, श्री विपिनपटियालः, डा. बिक्रमबाद्यकरः, डा. अरुणादेवी, डा. महेशशर्मा, सुश्री अनीता, श्रीमती कपिलापुरोहित, श्रीमती अञ्जु, श्रीमती पूजा, श्री विजयः, श्री राजेशः, श्रीमती रीता, श्री अनुजः तथा अन्ये प्राध्यापकाः, कर्मचारिणः एवं विद्यार्थिनः उपस्थिताः आसन्। सर्वैः विजेतृविद्यार्थिनाम् उत्साहवर्धनं कृत्वा तेषां उज्ज्वलभविष्याय शुभकामनाः प्रदत्ताः। राज्यस्तरीयासु संस्कृतप्रतियोगितासु प्राप्ताभिः एताभिः उपलब्धिभिः महाविद्यालयस्य शैक्षणिक-सांस्कृतिकक्रियाकलापेषु नूतना ऊर्जा सञ्चारिता।

# समग्रशिक्षाविभागस्य असमसर्वकारस्य निर्देशानुसारं थमना-बीनापाणि-उच्चविद्यालये संस्कृतसप्ताहस्य सफलं समापनम्



हिमसंसकृतवार्ता, बाक्सा, असम

३१ अगस्त २०२६ तमे ख्रीष्टाब्दे सोमवासरे असमप्रदेशस्य बक्सा-जनपदस्यस्य थमना-बीनापाणि-उच्चविद्यालये संस्कृतदिवसस्य कार्यक्रमः आचरितः। समग्रशिक्षाविभागस्य असमसर्वकारस्य निर्देशानुसारं तथा संस्कृतभारत्याः उत्तरासमप्रान्तस्य सहयोगेन आयोजितम् अयं कार्यक्रमः विद्यालयस्य सभागृहे अद्य प्रातरारभ्य संस्कृतगीतैः, नृत्यैः तथा विविधैः सांस्कृतिककार्यक्रमैः सह समायोजितः।

कार्यक्रमस्य अवसरे वस्तुप्रदर्शनी तथा विद्यालयस्य छात्र-छात्राणां मध्ये संस्कृतश्लोकावृत्तिप्रतियोगितायाः अपि आयोजनं कृतम्। सर्वप्रथमं दीपप्रज्वलनेन कार्यक्रमस्य शुभारम्भः अभवत्। ततः विद्यालयस्य प्रधानाचार्यः श्रीमान् अच्युतदास-महोदयः वस्तुप्रदर्शन्याः उद्घाटनं कृतवान्। तदनन्तरं छात्र-छात्राणां मध्ये संस्कृतश्लोकावृत्तिप्रतियोगिता आयोजिताभवत्। प्रतियोगिता द्वयोः वर्गयोः आयोजिता। षष्ठकक्षातः अष्टमकक्षापर्यन्तं छात्राणां कृते आयोजिते 'क' वर्गे निहारिका तालुकदारः प्रथमस्थानं, जीयाश्री बरुवा द्वितीयस्थानं तथा अङ्किता कलिता तृतीयस्थानं प्राप्तवत्यः। नवम-दशमकक्षयोः छात्राणां कृते आयोजिते 'ख' वर्गे कुवली दासः प्रथमस्थानं, ममता दासः द्वितीयस्थानं तथा निमिषा। बडोः तृतीयस्थानं प्राप्तवत्यः। कार्यक्रमे विशिष्टातिथिरूपेण उपस्थितः गिरिशविद्यापीठ-विशेष-उच्चविद्यालयस्य संस्कृत- शिक्षकः श्री टङ्केश्वरपाठकः छात्र-छात्राणां कृते छात्रजीवने संस्कृतभाषायाः आवश्यकतां महत्त्वं च विषयीकरोति रसमयेन भाषणेन प्रेरणादायकं सम्बोधनं कृतवान्। सभायां छात्र-छात्राभिः संस्कृतगीतानि, नृत्यानि तथा अन्ये सांस्कृतिककार्यक्रमाः प्रस्तुताः। सभायाः सञ्चालनं विद्यालयस्य संस्कृतशिक्षकः श्री नयनज्योतिशर्मा अकरोत्। अद्यतनसभायामेव विजेतृभ्यः छात्रछात्रेभ्यः प्रमाणपत्राणि प्रदत्तानि। विद्यालयस्य सर्वेषां शिक्षक-शिक्षिकाणां तथा त्रिशताधिकानां छात्र-छात्राणां सान्निध्येन सभा अत्यन्तं शोभनरूपेण सम्पन्ना अभवत्। अन्ते प्रधानाचार्यस्य भाषणानन्तरं शान्तिमन्त्रेण सभायाः समापनं जातम्



# जिया-राजकीय-वरिष्ठ-माध्यमिक-विद्यालये सोल्लासम् आचरितः संस्कृतसप्ताहः

जिया। राजकीय-वरिष्ठ-माध्यमिक-विद्यालये जिया इत्यत्र दिनाङ्कात् २५/०८/२०२६ तः ३१/०८/२०२६ पर्यन्तं संस्कृतसप्ताहः महता हर्षोल्लासेन समायोजितः। अस्मिन् सप्ताहे सर्वे छात्राः संस्कृताचार्यस्य श्रीअनुषवर्यस्य मार्गदर्शने संस्कृतभाषायाः महत्त्वं विज्ञाय प्रातःकालीन-प्रार्थनासभातः आरभ्य सामान्य-व्यवहारेऽपि संस्कृतशब्दानां प्रयोगं कृत्वा अस्याः महत्तां प्राकटयन्। एतदतिरिच्य छात्राः संस्कृतभाषायाः प्रचार-प्रसारार्थं विविधासु गतिविधीषु, यथा—भाषणप्रतियोगितायां, घोषवाक्यलेखने (नारालेखने), चित्रकलायां, मेहन्दीप्रतियोगितायां, श्लोकोच्चारणे च सोत्साहं भागम् अगृह्णन्। समारोहस्य अवसरे विद्यालयस्य प्रधानाचार्यः श्रीरामप्रकाशवर्धनवर्यः छात्रान् सम्बोधयन् उक्तवान् यत्—"संस्कृतभाषा सर्वासाम् भारतीयभाषाणां जननी वर्तते। अस्माकं चत्वारः वेदाः अस्यामेव देवभाषायां रचिताः सन्ति। अत एव संस्कृतभाषा भारतवर्षस्य सामाजिकसंस्कृतेः धार्मिकदर्शनस्य च जीवनदायिनी विद्यते।"

# राष्ट्रीयपात्रतापरीक्षायां (नेट) विद्यार्थिनां साफल्यं विश्वविद्यालयस्य शैक्षणिक-उत्कृष्टतायाः प्रमाणम्- आचार्यः ललित कुमार अवस्थी






## राष्ट्रीयपात्रतापरीक्षायां सरदार- पटेल- विश्वविद्यालय- मण्डीनगरस्य इतिहास- विभागस्य विद्यार्थिनाम् उत्कृष्टं प्रदर्शनम्

**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा,**

सरदार-पटेल-विश्वविद्यालय-मण्डी-नगरस्य इतिहासविभागस्य विद्यार्थिनः राष्ट्रीय- पात्रता-परीक्षायां (नेट) उल्लेखनीयं साफल्यं प्राप्य विश्वविद्यालयस्य इतिहासविभागस्य च नाम राष्ट्रीयस्तरे गौरवान्वितं कृतवन्तः। राष्ट्रीयस्तरस्य प्रतिष्ठितपरीक्षायाम् इतिहासविभागस्य रवीन्द्र कुमारः (सत्रम् २०२३-२५), नेहा, गौरवः, विक्रान्तः च नेट-परीक्षाम्, आकृतिः, अनन्या, दीपकः दीपांशुः च विद्यावारिधि (पीएचडी) (सत्रम् २०२४-२६) इत्यस्यै नेट- परीक्षामुत्तीर्य स्वप्रतिभायाः, निष्ठायाः, अनुशासनस्य, निरन्तरपरिश्रमस्य च परिचयं दत्तवन्तः। कुलपतेः वर्धापनं सन्देशश्च अस्याम् उपलब्धौ विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. ललितकुमार अवस्थीमहोदयः सफलविद्यार्थिभ्यः हार्दिकीं वर्धापनां शुभकामनाः च यच्छन् अवदत् यत् राष्ट्रीय- पात्रता- परीक्षायां विद्यार्थिनां साफल्यं विश्वविद्यालयस्य कृते गर्वस्य विषयः अस्ति। सः अवदत् यत् एतादृशीषु राष्ट्रीयस्तरस्य प्रतिस्पर्धीपरीक्षासु विद्यार्थिनां साफल्यं विभागस्य गुणवत्तापूर्णां शैक्षणिक- व्यवस्थां, शोधपरकं वातावरणं, विद्यार्थिभ्यः च प्राप्यमाणं निरन्तरं मार्गदर्शनम् अपि रेखाङ्कितं करोति। विद्यार्थिनाम् इदं साफल्यं तेषां कठिनपरिश्रमस्य, विभागे उपलब्धस्य शैक्षणिक- शोधपरक- वातावरणस्य च परिणामः अस्ति। सः विद्यार्थिनां परिश्रमस्य, दृढसङ्कल्पस्य निष्ठायाः च श्लाघां कुर्वन् अवदत् यत् एतादृश्यः उपलब्धयः अन्यविद्यार्थिनः अपि उच्चशिक्षायाः शोधस्य च क्षेत्रे उत्कृष्टप्रदर्शनाय प्रेरयन्ति।

### विभागाध्यक्षस्य विचारः-

इतिहासविभागस्य विभागाध्यक्षः डॉ राकेशकुमारशर्मामहोदयः सफलविद्यार्थिनः वर्धापयन् अवदत् यत् नेट, जेआरएफ सदृशीषु राष्ट्रीयस्तरस्य परीक्षासु साफल्यप्राप्तिः विद्यार्थिनां कृते एका महती अकादमिकोपलब्धिः अस्ति। सः अवदत् यत् इतिहासविभागः विद्यार्थिषु विषयस्य गहनं ज्ञानं विकासयितुं तथा च तान् शोधाय, प्रतियोगीपरीक्षाभ्यः उच्चशिक्षायै च निरन्तरं प्रोत्साहयति।

### विद्यार्थिनां प्रसन्नता अन्येषां शुभकामनाश्च-

सफलाः विद्यार्थिनः स्वोपलब्धौ प्रसन्नतां प्रकटयन्तः स्वसाफल्यस्य श्रेयः स्वमातापितृभ्यां, गुरुजनेभ्यः, विभागाध्यक्षाय विभागस्य शिक्षकेभ्यः च दत्तवन्तः। विद्यार्थिनः अवदन् यत् विश्वविद्यालये प्राप्तं शैक्षणिकं मार्गदर्शनं सकारात्मकं वातावरणं च तान् राष्ट्रीयस्तरस्य परीक्षायाः सज्जतायां विशेषरूपेण साहाय्यं प्रदत्तवन्ति। छात्रकल्याण- अधिष्ठाता आचार्यः राजेशकुमारशर्मा, अकादमिक- प्रकरण- अधिष्ठाता डॉ. पवनचन्दः, इतिहास- विभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मा, सहायकाचार्याः डॉ. रामपालः, विकेश कुमारः, राजेशशर्मा, अतिथिप्राध्यापकः कृष्णचन्दः, शोधार्थिनः विद्यार्थिनः च अपि सर्वान् सफलार्थिनः वर्धापितवन्तः, तेषाम् उज्ज्वलभविष्यस्य कामनां च कृतवन्तः।

## संस्कृतसप्ताहस्य उपलक्ष्ये संस्कृतप्रतियोगिताः हर्षोल्लासेन सम्पन्नाः

**हिमसंस्कृतवार्ताः- नाहनम्।**

संस्कृतसप्ताहस्य उपलक्ष्ये भाषासंस्कृतिविभागेन आयोजिताः संस्कृतप्रतियोगिताः गोरक्षनाथ- राजकीय- संस्कृतमहाविद्यालये, नाहने हर्षोल्लासेन सम्पन्नाः। अस्मिन् कार्यक्रमे जनपदसिरमौरस्य विभिन्नविद्यालयेभ्यः आगताः छात्राः छात्राश्च उत्साहपूर्वकं प्रतियोगितासु भागं गृहीतवन्तः। सर्वेषां प्रतिभागिनाम् उत्कृष्टं प्रदर्शनम् अभवत्। अवसरेऽस्मिन् राजकीय- संस्कृत- शिक्षकपरिषदः, जनपदसिरमौरस्य अध्यक्षः आचार्यः देवेन्द्रशर्मा स्वीयैः मधुरैः प्रेरणादायिभिः च वचनैः प्रतियोगितानां सफलायोजनाय सर्वेभ्यः धन्यवादं कृतवान्। सः उच्चशिक्षोपनिदेशकं डॉ. मदनलाल-महोदयं, प्रारम्भिकशिक्षोप-निदेशकं राजीवठाकुरमहोदयं, भाषासंस्कृति-विभागस्य अधिकारिणीं कान्तानेगीमहोदयां, गोरक्षनाथ- राजकीय- संस्कृत- महाविद्यालयस्य प्राचार्यं नरेशचन्द्रमहोदयं विशेषरूपेण धन्यवादं ज्ञापितवान्। जनपदस्य विभिन्नविद्यालयेभ्यः आगतानां सर्वेषाम् अध्यापकानाम् अध्यापिकानां च, प्रतियोगितासु भागं गृहीतवतां छात्राणां च हार्दिकम् अभिनन्दनं कृत्वा धन्यवादं प्रकटितवान्। आचार्यदेवेन्द्रशर्मा सर्वेभ्यः



संस्कृतसप्ताहस्य हार्दिकाः शुभकामनाः प्रदाय संस्कृतभाषायाः प्रचार- प्रसाराय संरक्षणाय च निरन्तरं प्रयत्नं कर्तुं सर्वान् प्रेरितवान्।

प्रतियोगितानां परिणामाः-

**श्लोकोच्चारणप्रतियोगिता**

प्रथमस्थानम्- प्रतिज्ञा, राजकीयः उच्चविद्यालयः, सिरमौरीताल।

द्वितीयस्थानम्- हर्षितठाकुरः, राजकीयः उच्चविद्यालयः, बनाकीसेर।

तृतीयस्थानम्- स्नेहाशर्मा, राजकीयः उच्चविद्यालयः, छौभोगर।

**निबन्धलेखनप्रतियोगिता**

प्रथमस्थानम्- समृद्धिभारद्वाजः, ए.वी.एन. विद्यालयः, नाहनम्।

द्वितीयस्थानम्- साक्षीठाकुरः, राजकीयः उच्चविद्यालयः, बनाकीसेर।

तृतीयस्थानम्- यशस्वी, पाइनवुड पब्लिक विद्यालयः, जमटा।

**संस्कृतगीतिका- प्रतियोगिता**

प्रथमस्थानम्- स्निग्धा, ए.वी.एन. विद्यालयः, नाहनम्।

द्वितीयस्थानम्- संजना, राजकीयः उच्चविद्यालयः, छौभोगर।

तृतीयस्थानम्- जायसमीनकौर, एस.वी.एन. विद्यालयः, नाहनम्।

**प्रश्नोत्तरीप्रतियोगिता**

प्रथमस्थानम्- राजकीयः वरिष्ठमाध्यमिकविद्यालयः, मूंगलावाला करतारपुर।

द्वितीयस्थानम्- पाइनवुड पब्लिक विद्यालयः, जमटा।

तृतीयस्थानम्- राजकीयः उच्चविद्यालयः, सिरमौरीताल।



## संस्कृत-सप्ताहोत्सवस्य समापनम्: प्रश्नोत्तरी-प्रतियोगितायां प्रतियोगितायां 'रानी लक्ष्मीबाई' सदनेन प्रथमं स्थानं प्राप्तम्

राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-पाठशालायाम् (कोटि-धीमान्) इत्यत्र संस्कृत-सप्ताहस्य अन्तिमे दिवसे एका भव्या प्रश्नोत्तरी-प्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां 'रानी लक्ष्मीबाई' सदनेन प्रथमं स्थानं प्राप्तम्।कार्यक्रमस्य आरम्भे संस्कृत-आचार्यः श्री-अतुल-शर्मा-महोदयः सप्ताहभरं प्रचालितानां विविधानां संस्कृतात्मिकानां गतिविधीनां सविस्तरं विवरणं प्रस्तुतवन्तः।अस्य भव्य-आयोजनस्य साफल्यं दृष्ट्वा विद्यालयस्य प्रधानाचार्यः श्री-परशुराम-महोदयः टी.जी.टी. (TGT) संस्कृत-आचार्याय श्री-अतुल-शर्मा-महोदयाय भूरि-भूरि धन्यवादं साधुवादं च ज्ञापितवन्तः। प्रधानाचार्य-महोदयैः उक्तं यत् एतादृशाः कार्यक्रमाः छात्रेषु भाषायाः संस्कारस्य च विकासं कुर्वन्ति।कार्यक्रमस्य अन्ते मुख्य-संयोजकः आचार्यः श्री-अतुल-शर्मा-महोदयः स्ववक्तव्यं स्थापयन्तः प्रधानाचार्य-महोदयानां तथा च सर्वेषां सहायक-शिक्षकाणां सहर्षं धन्यवादं कृतवन्तः, येषाम् अमूल्येन सहयोगेन अयं संस्कृत-सप्ताहः पूर्णरूपेण सफलः अभवत्।

# बढ़ेडा-विद्यालये संस्कृतसप्ताहस्य भव्यसमापनम्, सेवानिवृत्तः शिक्षकः दीपराजशास्त्री मेधाविनः छात्रान् सम्मानितवान्

**हिमसंस्कृतवार्ताः- आचार्या शिवानी**

राजकीय- वरिष्ठ- माध्यमिक- विद्यालये 'संस्कृत-सप्ताह- समापन- समारोहः' अतीव आदरपूर्वकं सम्पन्नः अभवत्। अस्मिन् विशेष-अवसरे छात्राः संस्कृतभाषायाः महत्त्वं ज्ञातवन्तः। परीक्षायाम् उत्तम-अङ्कान् प्राप्तवन्तः प्रतिभावन्तः छात्राः च विशेषरूपेण पुरस्कृताः अभवन्। समारोहस्य अवसरे संस्कृतपरीक्षायां सर्वश्रेष्ठ- अङ्कान् प्राप्य विद्यालयस्य नाम उज्ज्वलीकृतवन्तः मेधाविनः छात्राः सम्मानिताः। संस्कृत- शिक्षक- परिषद्- हरोली-खण्डस्य संरक्षकः, सेवानिवृत्तः संस्कृतशिक्षकः दीपराजशास्त्रीवर्यः मेधाविभ्यः छात्रेभ्यः आरुषी, नक्श, तमन्ना, अनन्या, अनन्या देवी, मनीषा कुमारी, जशन इत्येतेभ्यः विशेष- स्मृतिचिह्नानि दत्त्वा तान् सम्मानितवान्, तेषाम् उज्ज्वल-भविष्यस्य कामनां च कृतवान्। अस्मिन् समये विद्यालयस्य संस्कृतशिक्षिका शिवानी छात्रान् सम्बोध्य संस्कृतभाषायाः वैज्ञानिकस्वरूपस्य, अस्य सरल-व्याकरणस्य च विषये विस्तरेण अवदत्। सा छात्रान् जीवने नैतिक-मूल्यानां महत्त्वं बोधयित्वा एतां प्राचीनां भाषां व्यवहारे आनेतुं प्रेरितवती। समारोहे शिक्षा- उपनिदेशक- कार्यालयस्य गुणवत्ता- नियन्त्रकः उपनिदेशकः नीरजगर्गमहोदयः स्वस्य दलेन सह विशेषरूपेण उपस्थितः आसीत्। उपनिदेशकः तस्य दलं च विद्यालयस्य पठन-पाठनस्तरस्य संस्कृत- शिक्षणस्य च उच्च-गुणवत्तायाः भूरि-भूरि प्रशंसां कृतवन्तः। विद्यालयस्य यशस्विनी प्रधानाचार्या प्रेरणा वत्सलवर्या मुख्यातिथेः नीरजगर्गवर्यस्य, तस्य सम्पूर्णदलस्य च आदरपूर्वकं स्वागतं कृतवती, धन्यवादं च प्रकटितवती। सा सर्वेभ्यः सम्मानित-छात्रेभ्यः एतस्याः उपलब्धेः कृते वर्धापनानि दत्तवती। अस्मिन् अवसरे विद्यालयस्य सर्वे शिक्षकाः कर्मचारिणः च उपस्थिताः आसन्।




# संस्कृतसंस्कारैः एव सशक्ता भविष्यति नारी, तदैव सुरक्षिता स्थास्यति भारतीयसंस्कृतिः- डॉ. मुकेशकुमारओझाः

**हिमसंस्कृतवार्ता राघव नाथ झा, पाटलिपुत्रम्**

राजकीय- महिला- महाविद्यालयस्य, गुलजारबाग इत्यस्य संस्कृतविभागस्य तत्त्वावधाने सोमवासरे संस्कृतसप्ताहसमारोहः सोत्साहम्, उल्लासेन गरिमामये च वातावरणे सम्पन्नः जातः। अस्मिन् समारोहे मुख्यातिथिः डॉ. मुकेशकुमारओझाः, महाविद्यालयस्य प्राचार्या श्रुतितितिरवे तथा दिल्लीस्थस्य 'लेडी श्रीराम' महाविद्यालयस्य संस्कृतछात्रा मोनिका झा इत्येतेषां गरिमामयी उपस्थितिः आसीत्। कार्यक्रमस्य शुभारम्भः अतिथिभिः दीपप्रज्वालनेन कृतः। तदनन्तरं मोनिका झा इत्यनया वैदिकमङ्गलाचरणं तथा डॉ. पूनममहोदयया लौकिकमङ्गलाचरणं प्रस्तुतम्। स्वागतसमारोहे राधा तथा खुशी इति छात्राभ्यां स्वागतगीतं प्रस्तूय वातावरणं सरसीकृतम्। संस्कृतसप्ताहस्य अवसरे छात्राणां भाषिकी-, सांस्कृतिकी- बौद्धिकी-अभिवृद्धीः प्रोत्साहयितुं श्लोकवाचनम्, संस्कृतगीतम्, भित्तिपत्रनिर्माणम् (पोस्टर), सङ्ख्यागणना, प्रश्नोत्तरीप्रतियोगिताः च आयोजिताः। एतासु प्रतियोगितासु संस्कृतविभागेन सह आङ्ग्ल- सामाजिकविज्ञान- इतिहासविभागानां छात्राः अपि सोत्साहं भागम् अगृह्णन्। खुशी, ज्योतिः, शीतला, स्नेहा, मीनाक्षी, प्रज्ञा, राधा, आरती, सिमरन, सत्यम, सृष्टिः, शमा च विभिन्नप्रतियोगितासु प्रथम- द्वितीय- तृतीयस्थानं प्राप्य स्वप्रतिभायाः उत्कृष्टं प्रदर्शनम् अकुर्वन्। प्राचार्या श्रुतितितिरवे स्वकीय-उद्बोधने संस्कृतं सर्वासाम् भाषाणां जननीं कथयन्ती अवदत् यत् इयं केवलं भाषा नास्ति, अपि तु भारतीयज्ञानस्य, संस्कृतेः, जीवनमूल्यानां च आधारशिला अस्ति। सा "विद्या ददाति विनयम्" इत्यादीनां सुभाषितानां माध्यमेन छात्राभ्यः संस्कृतस्य प्रासङ्गिकतां नैतिकमूल्यानि च अबोधयत्। मुख्यातिथिः डॉ. मुकेशकुमारओझाः उक्तवान् यत्, "संस्कृतसंस्कारैः एव सशक्तनार्याः सशक्तसमाजस्य च निर्माणं सम्भवम् अस्ति। भारतीयसभ्यतायाः, संस्कृतेः, संस्काराणां च संरक्षणस्य संवर्धनस्य च सर्वाधिकं प्रभावशालि माध्यमं संस्कृतमेव। यदा कन्याः संस्कृतेन, भारतीयज्ञानपरम्परया, जीवनमूल्यैश्च संयोजिष्यन्ते, तदैव अस्माकं सांस्कृतिकपरम्परा सुरक्षिता स्थास्यति, राष्ट्रं च सशक्तं भविष्यति।" सः छात्राः प्रति दैनन्दिनजीवने संस्कृतसम्भाषणम् अङ्गीकर्तुं भारतीय- सांस्कृतिक-मूल्यानि च आचरणे आनेतुम् आह्वानम् अकरोत्। 'लेडी श्रीराम' महाविद्यालयस्य दिल्ली इत्यस्य छात्रा मोनिका झा आधुनिक- संस्कृतगीतस्य सुमधुरप्रस्तुत्या सम्पूर्णं सभागारं मन्त्रमुग्धम् अकरोत्। कार्यक्रमस्य सफलं सञ्चालनं संस्कृतविभागाध्यक्षा डॉ. रञ्जुकुमारी अकरोत्, धन्यवादाभिव्यक्तिं च डॉ. कुमारी मणिः प्रास्तौत्। अन्ते शान्तिपाठेन सह समारोहस्य समापनम् अभवत्।

# गौडमहाविद्यालये संस्कृतसप्ताहस्य समापनसमारोहः

**हिमसंस्कृतवार्ता, डॉ. निशिकान्तपाण्डेयः**

गौडमहाविद्यालयस्य संस्कृतविभागेन आयोजितः संस्कृतसप्ताहस्य समापनकार्यक्रमः ३१/०८/२०२६ दिनाङ्के सम्पन्नः अभवत्। गौडमहाविद्यालयस्थे ११० संख्याके कक्षे प्रायः द्विशत-छात्रछात्राणाम् उपस्थितौ अयं कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे छात्रछात्राः संस्कृतविषयकाणि विविधानि भाषणानि प्रस्तुतवन्तः नृत्यानुष्ठानं च कृतवन्तः। अस्मिन् अवसरे उपस्थिताः आसन् अध्यापकः डॉ. निरञ्जन-मृधा, अध्यापकः अनिर्बाण-रायः, अध्यापिका सुप्रिया-विश्वासः, विभागाध्यक्षः डॉ. विजय-घोषः, अध्यापकः आपन-शिकदारः, अध्यापकः श्यामल-पालः तथा मान्यवरः जय-साहा महोदयः। छात्रछात्राणाम् उत्साहेन अयं कार्यक्रमः साफल्यमण्डितः सञ्जातः।

# वार्ता-संवादः


**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि।

**नन्दिनी-** एका विचित्रा वार्ता अस्ति। क्रीडा-स्पर्धायाम् एकेन क्रीडा-गणेन पराजयः स्वीकृतः। यतः तेषां मुद्रणयन्त्रं भग्नं जातम्, अतः तैः प्रमाण-पत्राणि न दत्तानि।

**काव्या-** अहो! मुद्रण-यन्त्रस्य दोषेण तैः पराजयः प्राप्तः? एतत् अतीव विचित्रम्! अन्यस्मिन् देशे, एकेन स्थूलमूषकेन प्रथमक्रीडायां विजयः प्राप्तः। तस्य भारः त्रयोदश-पौन्ड-परिमितः, शोधकर्तृभिः च सः एव विजेता घोषितः।

**नन्दिनी-** आश्चर्यम्! मूषकेण अपि विजयः प्राप्तः! इदानीम् अन्यां वार्तां शृणु। दीक्षान्त-समारोहे एकेन मार्जारेण सर्वेषां ध्यानम् आकृष्टम्। सः मार्जारः मञ्चम् आगतः। तत्र गत्वा तेन



अपि उपाधिः प्राप्तः।

**काव्या-** हा हा! मार्जारेण अपि उपाधिः प्राप्तः! अतीव हास्यजनकम्। अन्ते एका अन्या वार्ता अस्ति। एकेन कलाकारेण धनस्य पुरस्कारः घोषितः। पादरक्षा-बन्धकाय धनं दीयते इति तेन उक्तम्। परन्तु उद्याने अन्येन एकेन अज्ञातेन जनेन उपविष्टम्। भ्रान्त्या अन्यैः जनैः तस्य अज्ञातजनस्य एव पादरक्षा-बन्धः कृतः। तेन तत्र महती भ्रान्तिः उत्पन्ना।

**-ईदर धीरजः**

# सीतापुरे संस्कृतप्रतिभा

## अन्वेषणप्रतियोगिता सम्पन्ना, छात्रैः प्रदर्शिता स्वप्रतिभा



**हिमसंस्कृतवार्ताः- सीतापुरम्।**

उत्तरप्रदेशसंस्कृतसंस्थानेन, लखनऊद्वारा आयोजितायाः 'संस्कृत- प्रतिभान्वेषण- प्रतियोगिता– २०२६' अन्तर्गतं सीतापुरजनपदस्तरीय- संस्कृतसामान्यज्ञान- संस्कृतगीत- प्रतियोगितयोः आयोजनं ३१ अगस्त २०२६ दिनाङ्के श्यामदासपुरस्थिते आशुतोष- बृजमोहनलाल- स्मारकमहाविद्यालये उत्साहपूर्णवातावरणे सम्पन्नम्। जनपदस्य विभिन्नविद्यालयेभ्यः आगतैः छात्रैः प्रतियोगितायां उत्साहेन सहभागः कृतः। प्रतियोगितायां छात्रैः संस्कृतभाषायाः प्रति स्वीयां रुचिं, ज्ञानं प्रतिभां च प्रस्तुतम्। संस्कृत- सामान्यज्ञान- प्रतियोगितायां गौरवमिश्र प्रथमस्थानम्, आयुषी सिंह द्वितीयस्थानं तथा अनिकेतपोरवाल तृतीयस्थानं प्राप्तम्। तथैव संस्कृतगीतप्रतियोगितायां प्रतीक्षाराजा प्रथमस्थानं, आरुषीमिश्रा द्वितीयस्थानं तथा विकासकुमारः तृतीयस्थानं प्राप्तवन्तः। विजेतृछात्रैः स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृत्वा उपस्थितानां मनांसि आकृष्टानि।

कार्यक्रमे मौलानाआजादस्य संस्कृतशिक्षकः प्रदीपकुमारः मुख्यातिथिरूपेण उपस्थितः आसीत्। सः छात्रान् सम्बोधयन् संस्कृतप्रतिभान्वेषणस्य महत्त्वं प्रतिपादितवान् तथा संस्कृताध्ययने निरन्तरं प्रवृत्ताः भवितुं छात्रान् प्रेरितवान्।

प्रतियोगितायाः निर्णायकमण्डले फखरुद्दीन- अलीअहमद- राजकीय- स्नातकोत्तर- महाविद्यालयस्य संस्कृतशिक्षिका डॉ. जेबाखान्, हिन्दीशिक्षकः डॉ. सलिलतिवारी, उत्तरप्रदेश- संस्कृतसंस्थाने कार्यरतः सत्येन्द्रपाठकः, मन्तशाजहाँ च उपस्थिताः आसन्। निर्णायकमण्डलेन छात्राणां प्रस्तुतयः सूक्ष्मतया परीक्ष्य परिणामाः निर्धारिताः। प्रतियोगितायाः सञ्चालनं जनपदसंयोजिका महकगुप्ता अकरोत्। सा प्रतिभागिभ्यः प्रतियोगितायाः नियमाः प्रक्रियां च अवगतवती तथा तान् उत्साहेन सहभागितायै प्रेरितवती। सम्पूर्णे कार्यक्रमे छात्रेषु विशेषः उत्साहः दृष्टः। कार्यक्रमस्य समापनं संस्थायाः उपप्रबन्धकस्य अञ्जनेय आशीष वाजपेयी इत्यस्य मार्गदर्शनेन सम्पन्नम्। सः छात्राणां प्रयासानां प्रशंसां कृत्वा संस्कृतभाषायाः अध्ययनाय, सम्भाषणाय भारतीयज्ञानपरम्परायाः च परिचयाय निरन्तरं प्रयत्नं कर्तुं प्रेरितवान्। अवसरेऽस्मिन् उपस्थितैः अतिथिभिः निर्णायकमण्डलेन च विजेतृछात्रेभ्यः हार्दिकशुभकामनाः प्रदत्ताः। संस्कृत- प्रतिभान्वेषण- प्रतियोगितया छात्राणां प्रतिभायाः प्रदर्शनाय प्रभावी मञ्चः प्राप्तः तथा तेषु संस्कृतभाषायाः प्रति अनुरागः उत्साहश्च वर्धितः।

# दरभङ्गा-यूनेस्को-क्लब-पक्षतः डीएमसीएच- सभागारे

## अन्तर्विद्यालयीन- राधा- कृष्ण- नृत्यप्रतियोगिता- २०२६ आयोजिता





### प्रतियोगितायाः कनिष्ठवर्गे 'संस्कृति इण्टरनेशनल स्कूल', वरिष्ठवर्गे 'पब्लिक स्कूल, बेला, दरभङ्गा' इत्यनेन प्रथमस्थानं प्राप्तम्

**हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभंगा**

दरभङ्गा- यूनेस्को- क्लब-माध्यमेन क्लब- अध्यक्षस्य विनोदकुमार-पंसारी-महोदयस्य अध्यक्षते डीएमसी- दरभङ्गा- सभागारे "अन्तर्विद्यालयीन- राधा-कृष्ण- नृत्यप्रतियोगिता- २०२६" समारोहेण आयोजिता। अस्य कार्यक्रमस्य उद्घाटनं बिहार-भाजपा-प्रदेशाध्यक्षेण सञ्जय- सरावगी- महोदयेन कृतम्। मुख्य-अतिथिरूपेण दरभङ्गासांसदः गोपालजीठाकुरः, विशिष्टातिथिरूपेण च डीएमसीएच-प्राचार्यः डॉ. यू. सी. झा, संरक्षकाः डॉ. बी. के. मिश्रः, भूतपूर्व- कुलपतिः प्रो. समीरकुमारवर्मा, महासचिवः प्रो. मधुरञ्जनप्रसादः इत्यादयः समुपस्थिताः सम्बोधितवन्तश्च। प्रथमसत्रस्य सञ्चालनं डॉ. ए. डी. एन. सिंह-महोदयेन शङ्खध्वनिना सह मनोहररूपेण कृतम्। प्रतियोगितायाः प्रारम्भः अतिथिभिः दीपप्रज्वालनेन अभवत्, अतिथीनां स्वागतं च पाग- वस्त्र- पुष्पगुच्छ- स्मृतिचिह्नादिभिः कृतम्। अस्मिन् अवसरे क्लबसदस्याः, विविधविद्यालयानां शिक्षकाः, छात्राः, बहवः प्रतिभागिनश्च उपस्थिताः आसन्। नृत्यप्रतियोगितायाः सञ्चालनं मनोजकुमार- डोकानिया, छवि- अग्रवाल -महोदयाभ्यां च कृतम्। निर्णायक-मण्डले डॉ. ए. डी. एन. सिंहः, मोहित-खण्डेलवालः, ज्योतिप्रकाशः (मोनू रायः) च सम्मिलिताः आसन्।इयं प्रतियोगिता कनिष्ठवर्गे (कक्ष्या १ तः ५) वरिष्ठवर्गे (कक्ष्या ६ तः १०) च विभक्ता आसीत्। आहत्य अष्टादश (१८) विद्यालयाः भागं गृहीतवन्तः।

**कनिष्ठवर्गस्य परिणामः-**

प्रथमस्थानम्- संस्कृति इण्टरनेशनल स्कूल, राघोपुरम्
द्वितीयस्थानम्- न्यू इरा पब्लिक स्कूल
तृतीयस्थानम्- डीएवी पब्लिक स्कूल

**वरिष्ठवर्गस्य परिणामः-:**

प्रथमस्थानम्- पब्लिक स्कूल, बेला, दरभङ्गा
द्वितीयस्थानम्- माउण्ट समर कॉन्वेंट स्कूल
तृतीयस्थानम्- एंजेल हाई स्कूल, भिगो

**नृत्यप्रतियोगितायाः प्रारम्भः 'कसक डान्स स्टूडिओ' इत्यस्य कलाकारैः गणेशवन्दनया कृतः**

सम्बोधने नगरविधायकः सञ्जय-सरावगी उक्तवान् यत् इयं प्रतियोगिता बालकान् भारतस्य महान्- संस्कृत्या सह संयोजयितुं प्रयासः अस्ति। यावत् बालकाः सनातनसंस्कृतौ गर्वं न कुर्वन्ति, तावत् भारतं विकसितं राष्ट्रं भवितुं न शक्नोति। सांसदः गोपालजी-ठाकुरः अवदत् यत् इदं केवलं नृत्यं न, अपि तु प्रेम-भक्ति-संस्काराणां सन्देशः अस्ति। अध्यक्षः विनोदकुमार-पंसारी उक्तवान् यत् यत्र कलायाः सम्मानः भवति, तत्र संस्कृतिः जीवति; यत्र च बालकानां प्रतिभायाः प्रोत्साहनं भवति, तत्र राष्ट्रस्य भविष्यम् उज्ज्वलं भवति। प्रमाणपत्र- पुरस्कारवितरणसत्रस्य सञ्चालनं संयोजकद्वयेन हीराकुमारझा, डॉ. अभयकुमार-कश्यपेन च कृतम्। धन्यवादज्ञापनं महासचिवः प्रो. मधुरञ्जनप्रसादः अकरोत्। अस्मिन् कार्यक्रमे डॉ. ओमप्रकाशः, डॉ. एस. एन. सराफः, डॉ. हर्षनारायणझा, डॉ. आर. एन. चौरसिया, रामबाबूशाहः, डॉ. आर. बी. खेतानः इत्यादयः बहवः सदस्याः सक्रियरूपेण सहयोगं कृतवन्तः।

# मिथिला चित्रकला संस्थाने बालसाहित्यकारस्य आदर्शभारद्वाजस्य भव्यं सम्मानम्

## पद्मश्री-राज्यपुरस्कार-सम्मानितैः कलाकारैः कृतं सम्माननम्, 'प्रधानमन्त्रि- राष्ट्रिय- बालपुरस्कारः २०२६' इत्यस्मै राष्ट्रपतेः श्रीमती- द्रौपदी- मुर्मु- महोदयायाः कृते प्रेषितः अनुशंसापत्रम्



**हिमसंस्कृतवार्ताः- राघव नाथ झा, मधुबनी।** मिथिलायाः समृद्धायाः कलायाः, साहित्यस्य, संस्कृतेश्च भूमौ मधुबनीनगरे सोमवासरे बालप्रतिभायाः साहित्यस्य च क्षेत्रे एकः विशिष्टः अवसरः दृष्टः। मिथिला चित्रकला संस्थाने आयोजिते गरिमामये कार्यक्रमे उदीयमानः बालसाहित्यकारः आदर्शभारद्वाजः स्वसाहित्यिक- उपलब्धीनां रचनात्मकयोगदानस्य च कृते सम्मानितः जातः। अस्मिन् अवसरे मिथिला- चित्रकलायाः संस्कृतेश्च क्षेत्रस्य लब्धप्रतिष्ठितानां विभूतीनाम् उपस्थित्या कार्यक्रमस्य गरिमा संवर्धिता। कार्यक्रमे मिथिला चित्रकला संस्थानस्य निदेशकः चन्द्रशेखरप्रसादसिंहः, पद्मश्री- सम्मानिता प्रसिद्धा कलाकारा बौआ देवी, पद्मश्री दुलारी देवी, पद्मश्री शिवम पासवानः, पद्मश्री शान्तिदेवी, राज्यपुरस्कार-सम्मानितः सञ्जयजायसवालः, राज्यपुरस्कार-सम्मानिता रानी देवी च कला-संस्कृति-जगतः अन्याः गण्यामान्याः विभूतयः आदर्शभारद्वाजं सम्मानितवन्तः। अस्मिन् अवसरे आदर्शस्य साहित्ययात्रायाः, तस्य पुस्तकानां, बालसाहित्यं प्रति तस्य समर्पणस्य च विषये विस्तरेण चर्चा संजाता। विशेषरूपेण तस्य अष्टानां प्रकाशितानां पुस्तकानां विषये साहित्यिक- विमर्शः अभवत्। उपस्थिताः महानुभावाः अल्पवयसि आदर्शस्य पुस्तकलेखनं प्रशंसन्तः तस्य रचनात्मक-चिन्तनस्य, कल्पनाशक्तेः, भाषायाः प्रति अभिनन्दनम् अकुर्वन्।

### अष्टानां पुस्तकानां विस्तृता साहित्यिकचर्चा

कार्यक्रमे आदर्शभारद्वाजस्य साहित्यिककृतिषु क्रमशः विचारः कृतः। तस्य पुस्तकेषु 'Algorithm of Fear', 'The Hidden World', 'Eternal Love', 'Divine Saga', 'Ink Before Age', 'The Midnight Anthology', 'बस्ते में कविता' तथा 'नन्हक आँखिसँ भूटान' समाविष्टानि सन्ति। एतासां कृतीनां माध्यमेन आदर्शः विविधसाहित्यिकविधाः विषयान् च स्पृष्टवान्।

### प्रधानमन्त्रि-राष्ट्रिय-बालपुरस्कारः २०२६' इत्यस्मै अनुशंसा-पत्रम्

समारोहस्य मुख्यं वैशिष्ट्यम् एतत् आसीत् यत् उपस्थितैः गण्यमान्य-व्यक्तिभिः 'प्रधानमन्त्रि- राष्ट्रिय- बालपुरस्कारः २०२६' कृते भारतस्य महामहिम-राष्ट्रपतेः श्रीमती- द्रौपदी- मुर्मु- महोदयायाः कृते अनुशंसा-पत्रं प्रेषितम्। अस्मिन् पत्रे आदर्शस्य साहित्यिक-योगदानं विशेषतः उल्लिखितम्। सम्मानप्राप्त्यनन्तरं आदर्शभारद्वाजः वरिष्ठेभ्यः कलाकारेभ्यः अतिथिभ्यश्च कृतज्ञतां न्यवेदयत्। तस्य मातापितरौ डॉ. सुरविन्द कुमार झा तथा डॉ. सुधा झा अपि सर्वेषां गण्यमान्यानाम् आभारं प्रकटितवन्तौ। अयम् उत्सवः न केवलम् आदर्शस्य कृते अपि तु सम्पूर्णाय मिथिलाञ्चलाय बालसाहित्यस्य क्षेत्रे नवप्रेरणायाः स्रोतः जातः।

# वेदप्रचारसप्ताहस्य पञ्चमदिवसे भाषणप्रतियोगितायाः आयोजनम्



**भागलपुरम्, ३१ अगस्त २०२६। डॉ विमलेश झा**

बिहारराज्यस्य डीएवीपब्लिकस्कूलबरारी-भागलपुरविद्यालयस्य परिसरे वेदप्रचारसप्ताहस्य पञ्चमदिवसे विविधकार्यक्रमाणाम् आयोजनं उत्साहपूर्वकं सम्पन्नम् अभवत्। अस्मिन् अवसरे विशेषप्रार्थनासभायां छात्रछात्राभिः सम्मिल्य "मनसा सततं स्मरणीयम्" इति संस्कृतगीतं मधुरस्वरेण प्रस्तुतम्। एतेन सम्पूर्णं विद्यालयपरिसरं संस्कृतमयेन वातावरणयुक्तं जातम्। तदनन्तरं सप्तमकक्षातः दशमकक्षापर्यन्तं छात्राणां कृते "संस्कृतभाषायाः अथवा वेदानां प्रासङ्गिकता" इति विषयमधिकृत्य भाषणप्रतियोगितायाः आयोजनं आयोजनम् अभवत्। प्रतियोगितायां छात्राः संस्कृत-हिन्दी-आंग्लभाषाभिः स्वविचारान् प्रभावपूर्णतया प्रस्तुतवन्तः। प्रतिभागिभिः संस्कृतभाषायाः महत्त्वं, वेदेषु निहितानां जीवनमूल्यानां प्रासङ्गिकता तथा आधुनिकजीवने वेदविचाराणां उपयोगिता इत्यादिविषयेषु स्वविचारान् प्रस्तुतवन्तः ।अस्मिन् अवसरे विद्यालयस्य शिक्षकः डा. चन्द्रहासभारती छात्रान् सम्बोधयन् अवदत्— "अस्माभिः वेदाध्ययने स्वसमर्पणं प्रदर्शनीयम्। वेदेषु प्रतिपादितानां सिद्धान्तानां पालनम् अस्माभिः स्वजीवने करणीयम्। वेदाः केवलं पठनीयाः न, अपितु तेषां आदर्शाः अस्माकं जीवनस्य मार्गदर्शकाः अपि भवितव्याः।"भाषणप्रतियोगितायाः निर्णायकत्वेन श्रीमती वसुन्धरा कुमारी तथा श्री सुनील कुमार मिश्र च महत्त्वपूर्णं योगदानं प्रदत्तवन्तौ। तौ प्रतिभागिनां भाषणस्य विषयवस्तु, प्रस्तुतीकरणं, भाषाशुद्धिं तथा प्रभावोत्पादकतां च आधारं स्वीकृत्य मूल्याङ्कनं कृतवन्तौ। एते सर्वे कार्यक्रमाः विद्यालयस्य प्राचार्यः सह सहायक क्षेत्रीय अधिकारी श्री अनिलकुमारमहोदयस्य मार्गदर्शने सफलतया सम्पन्नाः अभवन्। कार्यक्रमस्य सफलसञ्चालने निरेन्द्र प्रकाश सिंह, डेजीकुमारी, आशीषकुमारदास, अमरेशकुमार, संजयकुमारसिन्हा, अभिषेककुमारशर्मा , मुक्ता वर्मा, प्रतिमा राय चौधरी इत्यादीनां शिक्षकाणां भूमिका प्रशंसनीया आसीत्। सम्पूर्णकार्यक्रमे छात्राणां उत्साहः, संस्कृतभाषां प्रति अनुरागः तथा वेदज्ञानं प्रति जिज्ञासा स्पष्टतया दृश्यते स्म।



# मालदा जनपदे कल्पतरुसंस्थाने संस्कृतदिवससमारोहः

**हिमसंसकृतवार्ताः- तन्मयपाण्डेयः मालदा।** समारोहस्य प्रारम्भः दीपप्रज्वलनेन अभवत्। दीपज्वालनं कृतवती मालदाजनपदस्य कल्पतरु- संस्थानस्य अध्यक्षा अनिन्दिता रायः। ततः सभापतेः, आमन्त्रितानाम् अतिथीनाम् आसनग्रहणं परिचयश्च सम्पन्नः। अस्मिन् समारोहे संस्कृतभारती मालदाजनपदस्य कार्यकर्ता, कैकाला- संस्कृत-महाविद्यालयस्य अध्यापकः डॉ. निशिकान्त पाण्डेयः, केन्द्रीयवाद्यालयस्य योगशिक्षकः उज्ज्वलमाहातो, मालदाचिकित्साकेन्द्रस्य नवछात्रः कौशिकरविदासः, छात्राः च उपस्थाय सभायाः सौष्ठवं वर्धितवन्तः। तत्र आरोशी साहा इति अनेन संचालककार्यं संचालितवती। तदनन्तरं सुरसंगमे गीतम् इति षष्ठश्रेण्याः छात्राः प्रस्तुतवन्तः। मुख्यातिथिः डॉ. निशिकान्तपाण्डेयः संस्कृतभाषायाः महत्त्वं, संस्कृतस्य प्रचार- प्रसारस्य आवश्यकतां विषयीकृत्वा प्रेरणादायकं वक्तव्यं प्रस्तुतवान्। ततः निर्दिष्टवक्ता उज्ज्वलमाहातोवर्य संस्कृतदिवसस्य प्रासङ्गिकताम् उद्दिश्य वक्तव्यं प्रस्तुतम्। अनन्तरं छात्राणां संस्कृतगीतमेकं प्रस्तुतम्। तदनन्तरं कौशिकरविदासवर्येण भाषणं प्रदत्तम्। ततः अनिन्दिता रायवर्यया सामाजिकविषयेषु स्वकीयाः विचाराः प्रस्तुताः। अन्ते सा एव स्वकीयेन मन्तव्येन उपस्थितान् सम्बोधितवती। तदनन्तरम् अष्टश्रेण्याः छात्रा श्रेष्ठा वार्नाजी शान्तिमन्त्रं कृतवती। अन्ते जयघोषेण कार्यक्रमस्य समापनम् अभवत्। समारोहस्य माध्यमेन संस्कृतभाषायाः महत्त्वं तथा तस्याः प्रचार-प्रसारस्य आवश्यकता सर्वेषां समक्षं प्रतिपादिता। उपस्थितैः सर्वैः संस्कृतभाषायाः संरक्षणाय, संवर्धनाय च सहयोगस्य संकल्पः कृतः।




## संस्कृतसप्ताहमहोत्सवस्य सप्तमदिवसस्य सम्पूर्तिसमारोहस्य प्रतिवेदनम्

**हिमसंसकृतवार्ताः- डॉ. निशिकान्तपाण्डेयः**

३१.०८.२०२६ दिनाङ्के श्रीसीताराम- वैदिकादर्श- संस्कृत-महाविद्यालये संस्कृतसप्ताहमहोत्सवस्य सप्तमदिवसः अर्थात् सम्पूर्तिदिवसः विविधैः कार्यक्रमैः सह हर्षोल्लासेन सम्पन्नः। प्रातः सार्धदशवादनतः भगवद्गीताकण्ठपाठस्पर्धा, संस्कृतभाषणस्पर्धा, संस्कृत-निबन्धलेखन- स्पर्धा, स्फूर्तिस्पर्धा च आयोजिताः आसन्। एतासु विविधासु स्पर्धासु शताधिकाः छात्राः दशाधिकाभ्यः संस्थाभ्यः आगत्य उत्साहपूर्वकं भागं स्वीकृतवन्तः। छात्राणां सक्रियसहभागितया सर्वाः स्पर्धाः सफलतया सम्पन्नाः। अपराह्णे त्रिवादनतः संस्कृतसप्ताहमहोत्सवस्य सम्पूर्तिसमारोहः प्रारब्धः। अस्मिन् गरिमामये कार्यक्रमे डॉ. शोभन भट्टाचार्यवर्याय महामिलनमठस्य मठाध्यक्षाय विशेषतया सम्माननं प्रदत्तम्। तेषां संस्कृतभाषायाः प्रचारप्रसारे तथा संस्कृतसंरक्षणे योगदानं प्रशंस्य 'संस्कृतानुचारः' इति बिरुदेन सम्माननं कृतम्। सम्पूर्तिसमारोहस्य अध्यक्षतां श्रीसीताराम- वैदिकादर्श- संस्कृतमहाविद्यालयस्य अध्यक्षः प्रो. एस. सुब्रह्मण्यशर्मा महाभागः निरूढवान्। महाविद्यालयस्य प्राचार्यः डॉ. सोमेशकुमार मिश्रमहाभागः, अन्ये प्राध्यापकाः, आचार्याः तथा छात्राः च कार्यक्रमे सादरम् उपस्थिताः आसन्।कार्यक्रमस्य अन्ते विविधासु स्पर्धासु प्रथम- द्वितीय- तृतीयस्थानं प्राप्तेभ्यः छात्रेभ्यः पुरस्काराः प्रदत्ताः। प्रथमस्थानप्राप्तेभ्यः एकसहस्रं रूप्यकाणि, द्वितीयस्थानप्राप्तेभ्यः सप्तशतपञ्चाशद् रूप्यकाणि, तृतीयस्थानप्राप्तेभ्यः पञ्चशतं रूप्यकाणि पुरस्काररूपेण प्रदत्तानि। तैः सह विजेतृभ्यः पदान्यपि प्रदत्तानि। तथैव उपस्थितेभ्यः सर्वेभ्यः 'सरलमानकसंस्कृतम्' इति संस्कृतपुस्तकं प्रदत्तम्। एतेन संस्कृताध्ययनस्य रुचेः संवर्धनं तथा संस्कृतभाषायाः प्रचारप्रसारश्च अधिकं भवेत् इति उद्देश्यं परिपुष्टम्।

अन्ते कार्यक्रमसमन्वयकेन डॉ. सुब्रह्मण्यभट्टवर्येण सर्वेषाम् अतिथीनाम्, आचार्याणाम्, छात्राणां, संस्थानां तथा सहभागिनां प्रति हार्दिकं धन्यवादज्ञापनं कृतम्। सर्वेषां सहयोगेन एवं सक्रियसहभागितया संस्कृतसप्ताहमहोत्सवस्य सप्तदिनात्मकः कार्यक्रमः सुचारुरूपेण सफलतया च सम्पन्नः।

## संस्कृत सप्ताहोपलक्ष्ये आयोजिता "संस्कृतभाषायाः संरक्षण-संवर्धनस्य वर्तमानसमये आवश्यकता" इति राष्ट्रिय-ई-सङ्गोष्ठीसङ्गोष्ठी सम्पन्ना

**महेन्द्रगढः, ३१ अगस्त २०२६।**

संस्कृतदिवसस्य पावनावसरे ग्लोबल संस्कृत फोरम, हरियाणा प्रान्तः, स्वामी-दयानन्द-सरस्वतीपीठम्, हरियाणाकेन्द्रीयविश्वविद्यालयः, महेन्द्रगढः इत्येतयोः संयुक्ततत्त्वावधानेन "संस्कृतभाषायाः संरक्षण-संवर्धनस्य वर्तमानसमये आवश्यकता" इति विषयमधिकृत्य एकदिवसीया राष्ट्रिय-ई-सङ्गोष्ठीऑनलाइन-माध्यमेन अत्यन्तं गरिमापूर्णवातावरणे सम्पन्ना।

कार्यक्रमस्य अध्यक्षत्वं ग्लोबल संस्कृत फोरम, हरियाणाप्रान्तस्य अध्यक्षः प्रो. बलवीर आचार्य-महोदयः अकरोत्। मुख्यवक्तृत्वेन डॉ. हेमन्तकृष्ण मिश्र-महोदयः, प्राचार्यः, श्री तापड़िया आचार्य संस्कृत महाविद्यालयः, जसवन्तगढः, राजस्थानम्, उपस्थितः अभवत्।

मुख्यवक्तुः अनन्तरं विशिष्टातिथित्वेन मॉरिशसदेशात् प्रो. सत्यपाल सिंह-महोदयः कार्यक्रमे सादरं समुपस्थितः अभवत्। तेन सर्वेभ्यः संस्कृतसप्ताहस्य हार्दिक्यः शुभकामनाः प्रदत्ताः कार्यक्रमस्य भूरि-भूरि प्रशंसा च कृता। स्वकीयोद्बोधने तेन प्रतिपादितं यत् संस्कृतं न केवलं भारतस्य प्राचीनभाषा , अपितु सा विश्वस्य अमूल्यज्ञाननिधिः, भारतीयसंस्कृतेः आधारशिला, मानवकल्याणस्य प्रेरणास्रोतश्च अस्ति। संस्कृते निहितं ज्ञानं, विज्ञानं, दर्शनं, साहित्यं, संस्काराः च सम्पूर्णमानवसमाजस्य कल्याणाय सन्ति। संस्कृतभाषायां गुम्फितस्य वैदिकवाङ्मयस्य विश्वकल्याणस्य उदात्त भावना वसुधैव कुटुम्बकमिति सन्देशे निहिता वर्तते।

तेन प्रेरणादायकरूपेण कथितम्—

"संस्कृतस्य संरक्षणेनैव भारतीयसंस्कृतेः संरक्षणम्, संवर्धनं भारतीयज्ञानपरम्परायाश्च पुनर्जीवितं स्यादिति।"

कार्यक्रमस्य प्रारम्भे हरियाणा केन्द्रीय विश्वविद्यालयस्य संस्कृतविभागस्य छात्राभ्यां नीरज-मनीषाभ्यां मधुरस्वरेण मंगलाचरणं प्रस्तुतम्। तदनन्तरं हरियाणा केन्द्रीय विश्वविद्यालये स्वामी-दयानन्द-सरस्वती-पीठाध्यक्षया, डॉ. सुमन रानी-महोदयया, अतिथीनां परिचयः प्रदत्तः। तदनन्तरं वैदिकमन्त्राणां पावनध्वनिना कार्यक्रमस्य वातावरणं आध्यात्मिकतया संस्कृतिमयतया च परिपूर्णमभवत्।कार्यक्रमस्य कुशलं प्रभावशालि च मञ्चसञ्चालनं सुव्यवस्थितरूपेण डॉ. पूनम-महोदयया कृतम्, विविधसत्राणां वक्तॄणां च समुचितपरिचयः प्रदत्तः। सङ्गोष्ठ्यां संस्कृतभाषायाः वर्तमानस्थितिः, तस्याः संरक्षणस्य आवश्यकता, शिक्षाक्षेत्रे संस्कृतस्य भूमिका, आधुनिकप्रौद्योगिक्या सह संस्कृतस्य समन्वयः तथा वैश्विकस्तरे संस्कृतप्रसारादिविषयाः गम्भीरतया चर्चिताः। विद्वद्भिः एकस्वरेण प्रतिपादितं यत् संस्कृतस्य संरक्षणेनैव भारतीयज्ञानपरम्परायाः, संस्कृतेः, संस्काराणां, दर्शनस्य तथा राष्ट्रीयचेतनायाः संरक्षणम् भवितुमर्हति।कार्यक्रमस्य सफलायोजनाय डॉ. राकेशकुमारः, डॉ. रविप्रभातः तथा डॉ. शलिन्द्राचार्यः इत्येतेषां आयोजकमण्डलस्य सदस्याणां महत्त्वपूर्णं योगदानम् आसीत्। कार्यक्रमस्य प्रत्यक्षप्रसारणं 'संस्कार वाहिनी' इति यूट्यूब-माध्यमेन अपि कृतम्। अन्ते कार्यक्रमसंयोजिका डॉ. सुमन रानी-महोदया सर्वेषां विशिष्टातिथीनां, अध्यक्षस्य, मुख्यवक्तुः, विदुषां, आयोजकमण्डलस्य सदस्याणां, छात्राणां तथा प्रत्यक्ष-अप्रत्यक्षरूपेण कार्यक्रमे सम्बद्धानां सर्वेषां सहयोगमूरीकृत्य तान् प्रति हृदयपूर्वकं धन्यवादज्ञापनम् अकरोत्। तया संस्कृतभाषायाः संरक्षण-संवर्धनाय आह्वानमपि कृतम्।



## भक्तानां सङ्गतेः फलम्

एकदा देवर्षिः नारदः वैकुण्ठं गत्वा भगवन्तं विष्णुं प्रश्नम् अपृच्छत्- हे भगवन्! भक्तानां संसर्गेण कस्यचित् किं फलं भवति? भगवान् विष्णुः तदा स्मित्वा अब्रवीत्- हे नारद! पृथिव्याः एकस्मिन् वने कश्चन अश्वत्थवृक्षः अस्ति। तस्य वामतः एकस्यां शाखायां शुकस्य नीडम् अस्ति। तत्र शुकशावकस्य सद्यः जन्म अभवत्। तव एतं प्रश्नं तं पृच्छ। तत्र हि तव प्रश्नस्य उत्तरं प्राप्स्यसि। नारदमुनिः तदा भगवतः विष्णोः निर्देशानुसारं तस्य वृक्षस्य समीपं गत्वा तं शुकशावकं दृष्ट्वा तमेव प्रश्नम् अपृच्छत्। सः शावकः नारदस्य प्रश्नं श्रुत्वा तत्क्षणं हि तत्र भूमौ पतित्वा मृत्युम् अगच्छत्। एवं दृष्ट्वा अत्यन्तं दुःखितः देवर्षिः नारदः भगवतः विष्णोः समीपं गत्वा तत्र प्रवृत्तं सर्वं वृत्तान्तम् अश्रावयत्। भगवान् विष्णुः नारदस्य तद्वचः श्रुत्वा देवर्षिं नारदं कञ्चन ग्रामं गन्तुं निरदिशत् यत्र कस्यचिद् ब्राह्मणस्य गृहे सद्यः धेनुशावकस्य जन्म अभवत्। भगवान् विष्णुः देवर्षिं नारदम् अवदत् हे देवर्षे! त्वं तत्र गत्वा तं शावकं तव प्रश्नं पृष्ट्वा तव प्रश्नस्य उत्तरं प्राप्तुं शक्नोषि।

देवर्षिः नारदः तदा तं ग्रामं गत्वा तं धेनुशावकं तस्य तमेव प्रश्नं यदा अपृच्छत् तदा हि सः शावकोऽपि भूमौ पतित्वा मृतः अभवत्। ततः अत्यन्तं दुःखितः देवर्षिः नारदः चिन्तयति स्म, मन्ये अहं महान् पापी अस्मि। तयोः मृत्योः कारणं तु अहमेव। अत्यन्तं शोकाकुलः देवर्षिः नारदः वैकुण्ठं गत्वा पुनः भगवन्तं विष्णुं सर्वम् अश्रावयत्।

भगवान् विष्णुः तदा तं सान्त्वयित्वा अब्रवीत् हे देवर्षे ! "चिन्ता मास्तु" अत्र तव दोषः नास्ति। इदानीं त्वं काशीनरेशस्य गृहं गच्छ! तत्र सद्यः कस्यचिद् अश्वशावकस्य जन्म अभवत्। तं शावकं त्वं स्वीयं प्रश्नं पृच्छ। तस्य उत्तरं तस्मात् प्राप्स्यसि।

देवर्षिः नारदः तदा अपि सङ्कोचं करोति स्म, किन्तु भगवतः विष्णोः आज्ञाकारी देवर्षिः तत्र अत्यन्तं सावधानतया गत्वा तं शावकं प्रश्नम् अपृच्छत्। देवर्षेः तं प्रश्नं श्रुत्वा सः अश्वशावकोऽपि मृतः अभवत्। ततः अत्यन्तं निराशः सन् देवर्षिः नारदः भगवतः विष्णोः समीपं प्रत्यगच्छत्। नारदस्य पीडां दृष्ट्वा भगवान् विष्णुः पुनः स्मित्वा अब्रवीत् हे नारद! त्वं महत् कष्टं सोढ्वा अपि तव प्रश्नस्य उत्तरं न प्राप्नोः। इदानीं पुनः त्वं काशीराजस्य गृहं गच्छ। तत्र सद्यः महाराजस्य पुत्रः जन्म अलभत। तं शिशुं पृष्ट्वा तव प्रश्नस्य उत्तरं प्राप्स्यसि। भगवतः विष्णोः वचः श्रुत्वा देवर्षिः नारदः पुनः एकस्य मृत्योः कारणम् अहमेव ... क्रमशः...

मृत्योः कारणम् अहमेव भविष्यामि इति विचिन्त्य विरोधं कुर्वन् भगवन्तं विष्णुम् अब्रवीत् हे प्रभो! इत्यनेन अलम्! अहं पुनः अपरस्य कस्यचन मृत्योः कारणं भवितुं नेच्छामि। अहं पुनः राजकुमारस्य मृत्योः कारणं भवितुं नेच्छामि। अहं मम प्रश्नस्य उत्तरमपि प्राप्तुं नेच्छामि। अतः हे भगवन्! एवं पुनः मह्यम् आदेशं मा दात्। अहं तत्र गन्तुं न शक्नोमि। परन्तु तदा भगवान् विष्णुः तस्मै नारदाय आश्वासनं प्रदाय अब्रवीत् हे देवर्षे! इदानीं त्वं तव प्रश्नस्य उत्तरं निश्चयेन प्राप्स्यसि।

ततः अनिच्छन्नपि देवर्षिः नारदः काशीराजस्य राजभवनम् अगच्छत्। राजकुमारस्य जन्म अभवत् इत्यतः तत्र राजभवने अत्यन्तं हर्षोल्लासः आसीत्। महाराजः तदा देवर्षिं दृष्ट्वा आत्मानम् अत्यन्तं भाग्यशलिनं मत्वा आशीर्वादाय नवजातपुत्रं देवर्षेः समीपं नीत्वा अगच्छत्। देवर्षिः नारदः तदा तं शिशुं बाहुभ्यां गृहीत्वा शनैः तस्य तमेव प्रश्नम् अपृच्छत्। देवर्षिः तदा विस्मितः अभवत् यदा सः शिशुः अब्रवीत् हे ऋषीणां श्रेष्ठ। किं भवान् इदानीमपि न ज्ञातवान्? अहमेव सः पक्षिशावकः आसम्, भवतः संसर्गेण अहं तस्मात् पक्षिशरीरात् मुक्तः भूत्वा धेनुरूपेण जन्म लब्धवान्। ततः यदा भवान् मां धेनुशावकं प्रश्नम् अपृच्छत् तदा अहं तस्मात् शरीरात् मुक्तः भूत्वा अश्वरूपेण जन्म लब्धवान्। ततः पुनः भवतः संसर्गेण तस्मादपि मुक्तः भूत्वा इदानीं मनुष्यशरीरं प्राप्तवान्। अतः हे ऋषीणां वर! भवादृशस्य भक्तस्य संसर्गेण अहं सर्वपापेभ्यः मुक्तिं लब्ध्वा इदानीं मनुष्ययोनिं प्राप्तवान्। इत्येव भक्तानां सङ्गतेः फलम्। शिशोः तद्वचः श्रुत्वा सन्तुष्टः देवर्षिः नारदः पुनः वैकुण्ठम् प्रत्यगच्छत्। **प्रदीपनाथः, असमः, हिमसंस्कृतवार्ताः।**




## दरभङ्गा-राजस्य ऐतिहासिक-विरासत-संरक्षणम् : श्रीश्री१०८ मातृ-रुद्रेश्वरी-कामेश्वरी-श्यामा-मन्दिरयोः भव्य-जीर्णोद्धारः लोकार्पणं च सम्पन्नम्

दरभङ्गा (मिथिला)। राघव नाथ झा

दरभङ्गा-नगरस्य माधवेश्वर-कामेश्वरनगर-परिसरे स्थितयोः श्रीश्री१०८ मातृ-रुद्रेश्वरी-कालीमन्दिरस्य तथा श्रीश्री१०८ मातृ-कामेश्वरी-श्याममन्दिरस्य नूतन-जीर्णोद्धार-कार्यस्य भव्य-लोकार्पणं मङ्गलवासरे वैदिक-मन्त्रोच्चारणेन धार्मिकोल्लासेन च सम्पन्नम्। कामेश्वर-धार्मिक-न्यासस्य न्यासी कुमारः कपिलेश्वर-सिंहः, तस्य धर्मपत्नी रानी कविता-कुमारी-सिंहः, सुपुत्रः कुमारः अरिहन्त-सिंहश्च विधिवत् पूजनं कृत्वा समारोहस्य उद्घाटनम् अकुर्वन्। शङ्खवादकस्य विप्र-विपिन-मिश्रस्य मन्त्रोच्चारणैः, महाआरत्या, सहस्रशः भक्तानां महाप्रसाद-वितरणेन च कार्यक्रमस्य समापनम् अभवत्।समारोहं सम्बोधयन् न्यासी कुमार-कपिलेश्वर-सिंहः अवदत् यत् मातृ-रुद्रेश्वरी-मन्दिरं खण्डवाला-राजवंशस्य महाराजा-छत्र-सिंहस्य ज्येष्ठपुत्रस्य तथा दरभङ्गा-राजस्य अष्टादश-नरेशस्य महाराजा-रुद्र-सिंहस्य समाधि-स्थले प्रतिष्ठितम् अस्ति। महाराजा-रुद्र-सिंहेन १८३५ तमे वर्षे मुजफ्फरपुरे आङ्ग्ल-शिक्षायाः प्रथम-प्रतिष्ठानस्य ('एङ्गलो-वर्नाक्युलर-विद्यालयस्य') कृते पञ्च-सहस्र-रूप्यकाणि भूमिं च दत्त्वा मिथिलायाम् आधुनिक-शिक्षायाः सुदृढा आधारशिला स्थापिता। तस्य स्मृतौ १८५५ तमे वर्षे तस्य पुत्रेण महाराजा-महेश्वर-सिंहेन अस्य मन्दिरस्य निर्माणं कारितम् आसीत्।सः अग्रे अवदत् यत् मातृ-कामेश्वरी-श्याममन्दिरं दरभङ्गा-राजस्य अन्तिम-नरेशस्य महाराजाधिराज-डॉ. सर-कामेश्वर-सिंहस्य समाधि-स्थले विराजते। डॉ. कामेश्वर-सिंहः प्रथम-गोलमेज-सम्मेलनस्य कनिष्ठतमः प्रतिनिधिः, संविधान-सभायाः सदस्यः, काशी-हिन्दु-विश्वविद्यालयस्य प्र-कुलाधिपतिः (प्रो-चांसलर), राज्यसभा-सदस्यश्च आसीत्। तेन भूदान-आन्दोलने भूमिहीन-कृषकाणां कृते १.१७ लक्ष-एकड़-परिमित-भूमेः दानं कृतम्। तस्य समाधिस्थले १९६५ तमे वर्षे महारानी-राजलक्ष्म्या स्वकीय-धनेन अस्य मन्दिरस्य निर्माणं कारितम् आसीत्।

कार्यक्रमे मुख्य-अतिथिरूपेण उपस्थिताः कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. लक्ष्मविलाश-पाण्डेय-महोदयाः अवदन् यत् दरभङ्गा-राजवंशः धर्म-शिक्षा-संस्कृति-समाजसेवासु सम्पूर्णे भारते स्वकीयां विशिष्टां ख्यातिं धारयति। कुमार-कपिलेश्वर-सिंहः एतां गौरवमयीं परम्परां अग्रे नयन् धर्म-संस्कृति-संरक्षणे श्लाघनीयं कार्यं कुर्वन् अस्ति। कार्यक्रमस्य सञ्चालनं डॉ. सन्तोष-कुमारेण कृतम्।

अस्मिन् अवसरे डॉ. हेमपति-झा, वरिष्ठ-प्रचारकः डॉ. विनोद-यादवः, भाजपा-नेता रङ्गनाथ-ठाकुरः, दरभङ्गा-राजस्य मुख्य-प्रबन्धकः आशुतोष-दत्तः, अमरकान्त-झा, मीना-झा, मञ्जेश-चौधरी, निखिल-खेरिया, प्रियांशु-झा, प्रदीप-गुप्ता, ठाकुर-भूपेन्द्र-किशोरः, डॉ. गोपाल-ठाकुरः, सञ्जीव-झा प्रभृतयः गण्यामान्याः नागरिकाः सहस्रशः भक्ताश्च उपस्थिताः आसन्।

वार्ता-विशेषः (मुख्य-बिन्दवः)

### १८३५ तमे वर्षे आधुनिक-शिक्षायाः आरम्भः, १९६५ तमे वर्षे च समाधि-मन्दिरस्य निर्माणम्

महाराजा-रुद्र-सिंहेन १८३५ तमे वर्षे आङ्ग्ल-शिक्षायाः प्रसाराय महत्त्वपूर्णं योगदानं दत्तम्। ततः परं महाराजाधिराज-डॉ. सर-कामेश्वर-सिंहस्य स्मृतौ तस्य समाधौ १९६५ तमे वर्षे महारानी-राजलक्ष्म्या मातृ-कामेश्वरी-श्याममन्दिरस्य निर्माणं कारितम्। अधुना तयोः द्वयोः ऐतिहासिक-मन्दिरयोः जीर्णोद्धारेण दरभङ्गा-राजस्य सांस्कृतिक-धार्मिक-धरोहराय नूतनं भव्यं च स्वरूपं प्राप्तम्।



## संस्कृतसप्ताहे गुञ्जिता मिथिलायाः ज्ञानपरम्परा, 'सर्वतन्त्रस्वतन्त्रः पण्डितवाचस्पतिमिश्रः' वृत्तचित्रस्य (डॉक्यूमेण्ट्री) विशेषप्रदर्शनम्

### कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालये अभवत् प्रदर्शनम्, विद्वांसः कृतवन्तः शोधस्य, प्रस्तुतेः, निर्देशनस्य च श्लाघाम्

**दरभङ्गा, ३० अगस्त।राघव नाथ झा**

संस्कृतसप्ताहसमारोहस्यावसरे कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य 'दरबार हॉल्' इत्यत्र महान् दार्शनिकः सर्वशास्त्रविद् च पण्डितवाचस्पतिमिश्रस्य जीवने, दर्शने, भारतीयज्ञानपरम्परायां चाधारितस्य 'सर्वतन्त्रस्वतन्त्रः पण्डितवाचस्पतिमिश्रः' इति वृत्तचित्रस्य (डॉक्यूमेण्ट्री) विशेषप्रदर्शनं कृतम्। अस्मिन् कार्यक्रमे बहुसंख्याकाः विद्वांसः, शिक्षाविदः, शोधच्छात्राः, सामान्यच्छात्राश्च उपस्थिताः आसन्। वृत्तचित्रे पण्डितवाचस्पतिमिश्रस्य व्यक्तित्वं, कृतित्वं तथा च भारतीयदर्शने तस्य अतुलनीयं योगदानं शोधपूर्णया प्रभावशालिन्या च रीत्या उपस्थापितम्। प्रदर्शनानन्तरम् उपस्थिताः विद्वांसः दर्शकाश्च वृत्तचित्रस्य विषयवस्तु, ऐतिहासिकतथ्यानि, शोधकार्यं, चलच्चित्रीयाभिव्यक्तिं, निर्देशनं च मुक्तकण्ठेन प्राशंसन्। ते अवदन् यत् एतादृशं वृत्तचित्रं मिथिलायाः गौरवशालिनीं बौद्धिकीं सांस्कृतिकपरम्परां च नूतनपीढीं यावत् प्रापयितुं सशक्तं माध्यमं भवितुम् अर्हति।

इदं वृत्तचित्रं कला-संस्कृतिविभागः, बिहारसर्वकारः तथा च मण्डलाशासनम् (जिलाप्रशासनम्), मधुबनी इत्यनयोः प्रस्तुतिः अस्ति। अस्य निर्माणं 'शिमर फिल्म्स इण्टरनेशनल्' (Shimmer Films International) तथा च 'गाम घर' (Gaam Ghar) इत्यनयोः संयुक्ताश्रयेण कृतम्। अस्य वृत्तचित्रस्य निर्देशनं युवानः चलच्चित्रनिर्देशकः सुमितसुमनः अकरोत्। तस्य निर्देशने सज्जीकृता इयं कृतिः केवलं जीवनचरिताधारितं चलच्चित्रं नास्ति, अपि तु मिथिलायाः समृद्धां दार्शनिकपरम्परां, भारतीयज्ञानविमर्शं, सांस्कृतिकविरासतां च जन-जनं यावत् प्रापयितुम् एकः गम्भीरः सार्थकश्च प्रयासः अस्ति। वृत्तचित्रस्य माध्यमेन पण्डितवाचस्पतिमिश्रस्य बहुआयामी व्यक्तित्वं तस्य अमूल्यं बौद्धिकं योगदानं च सरलया, प्रभावशालिन्या, समकालीनशैल्या च प्रदर्शितम्, येन नूतना पीढी स्वकीयया ऐतिहासिकपरम्परया सह योजिता भवितुं शक्नुयात्। कार्यक्रमस्य समापने उपस्थिताः विद्वांसः इमं प्रयासं भारतीयज्ञानपरम्परायाः संरक्षणस्य प्रचार-प्रसारस्य च दिशि एकां महत्त्वपूर्णां पहलं प्रतिपादितवन्तः तथा च भविष्येऽपि एतादृशानां शोधपरक-सांस्कृतिकचलच्चित्राणां निर्माणस्यावश्यकतायाम् बलं दत्तवन्तः।

## उत्तरभारते लुप्तप्रायाष्टावधानपरम्परायाः पुनरुज्जीवनम्

# दिल्लीविश्वविद्यालये ऐदम्प्राथम्येन 'घण्टाशतकम्-अष्टावधानं च' इति विशिष्टकार्यक्रमस्य आयोजनम्





**नवदेहली, ३१ अगस्त।** संस्कृतदिवसस्य उपलक्ष्ये दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य तत्त्वावधाने 'घण्टाशतकम्-अष्टावधानं च' इति विशिष्टकार्यक्रमस्य आयोजनं विश्वविद्यालयस्य बौद्ध-अध्ययनविभागस्य संगोष्ठीकक्षे, विस्तारभवने कक्षासंख्या ३०५ इत्यत्र अभवत्। कार्यक्रमे संस्कृतस्य प्राचीनबौद्धिकपरम्परायाः विशिष्टविधीनां प्रत्यक्षं प्रदर्शनं कृतम्। कार्यक्रमे विश्वविद्यालयस्य आचार्याः, शोधार्थिनः, छात्राः संस्कृतानुरागिणश्च उत्साहपूर्वकं समुपस्थिताः आसन्।

कार्यक्रमस्य प्रथमं प्रमुखाकर्षणं घण्टाशतकस्य प्रस्तुतीकरणम् आसीत्। घण्टाशतकविधौ निर्धारिते एकस्मिन् घण्टाकाले शतं पद्यानां रचना करणीया भवति। अस्मिन् कार्यक्रमे डॉ. उमामहेश्वरेण केवलं पञ्चपञ्चाशत्सु(५५) निमेषेषु अष्टोत्तरैकशतं (१०८) पद्यानि रचितानि। काव्यरचनायाः मुख्यविषयः 'भारतं भारतम् इति' आसीत्। निर्धारितसमयात् पूर्वमेव शताधिकपद्यानां रचना कृत्वा डॉ. उमामहेश्वरेण असाधारणा काव्यप्रतिभा प्रदर्शिता। विशेषतया उल्लेखनीयम् अस्ति यत् एतत् डॉ. उमामहेश्वरस्य आधिकारिकरूपेण प्रथमं घण्टाशतकम् आसीत्। प्रथमे एव आधिकारिके घण्टाशतकप्रयासे निर्धारितं शतकं न केवलं पूर्णं कृतम्, अपितु निर्धारितसंख्यायाः अधिकानि १०८ पद्यानि ५५ निमेषेषु ५६ सेकण्ड्-मध्ये रचयित्वा तेन संस्कृतकाव्यस्य सृजनात्मकशक्तेः उत्कृष्टमुदाहरणं प्रस्तुतम्।अल्पसमये एकस्य विषयस्य सातत्यं स्थापयित्वा छन्दोबद्धानि, अर्थसम्पन्नानि तथा काव्यसौन्दर्ययुक्तानि शताधिकपद्यानि रचयितुं निश्चयेन उच्चस्तरीया काव्यप्रतिभा अपेक्षिता भवति। अतः डॉ. उमामहेश्वरस्य एषा उपलब्धिः कार्यक्रमस्य प्रमुखेषु आकर्षणेषु अन्यतमा अभवत्। उपस्थितैः विद्वद्भिः तस्य भूरिशः प्रशंसा कृता तथा एषा प्रस्तुतिः संस्कृतस्य पद्यरचनापरम्परायाः उल्लेखनीयम् उदाहरणम् इति अभिमतम्।घण्टाशतकस्य प्रस्तुतिं प्रशंसन् आचार्यः रमेशकुमारपाण्डेयः अवदत् - "एतत् सर्वं सरस्वत्याः सत्त्वस्य साक्षात् तादृशं रूपम् अस्ति, यत् वयं प्रत्यक्षीकृतवन्तः। एतादृशं प्रतिभाप्रदर्शनं निश्चयेन अत्यन्तम् अद्भुतम् अस्ति।" इति।तथैव आचार्यः सच्चिदानन्दमिश्रः डॉ. उमामहेश्वरस्य काव्यप्रतिभां विशेषतया प्रशंसन् अवदत् - "एषा उज्ज्वला प्रतिभा अस्ति। एतादृशी प्रतिभा कदाचिदपि मया न दृष्टा। अन्यविधाः आशुकाव्यगोष्ठ्यः, समस्यापूरणादिकं च मया



परन्तु एतादृशं प्रत्यक्षं प्रतिभाप्रदर्शनं कदापि न दृष्टमासीत्।" इति।

कार्यक्रमस्य द्वितीयं प्रमुखाकर्षणं अष्टावधानस्य प्रदर्शनम् आसीत्। अष्टावधानं भारतीयज्ञानपरम्परायाः विशिष्टं बौद्धिककौशलम् अस्ति। अस्मिन् अवधानी एकस्मिन् समये विभिन्नैः प्रच्छकैः प्रदत्तेषु अनेकविधेषु कार्येषु ध्यानं दत्त्वा तेषां क्रमं स्मृत्वा यथासमयं समाधानं प्रस्तौति। अस्मिन् स्मरणशक्तेः, एकाग्रतायाः, त्वरितचिन्तनस्य, भाषाप्रभुत्वस्य तथा काव्यप्रतिभायाः समन्वयः दृश्यते।उत्तरभारते दीर्घकालात् अष्टावधानपरम्परा प्रायः लुप्तप्रायाभवत्। कालक्रमेण अस्याः परम्परायाः प्रत्यक्षप्रदर्शनं विरलम् अभवत् तथा नूतनवंशक्रमेषु तस्याः परिचयः अपि न्यूनः जातः। एतादृशे समये डॉ. ऋषिराजपाठकेन अष्टावधानपरम्परायाः पुनरुज्जीवनाय महत्त्वपूर्णः प्रयासः कृतः। विशेषतया डॉ. ऋषिराजपाठकः उत्तरभारतस्य प्रथमः अष्टावधानी इति गौरवस्य अधिकारी अभवत्। तस्य अष्टावधानप्रदर्शनेन उत्तरभारते दीर्घकालात् क्षीणां जातां प्राचीनपरम्परां पुनः सार्वजनिकमञ्चे प्रतिष्ठापयितुं महत्त्वपूर्णं सोपानं स्थापितम्। अष्टावधानस्य अन्तर्गतं निषिद्धाक्षरी, समस्यापूरणम्, दत्तपदी, उद्दिष्टरागमालिका, सङ्ख्याबन्धः, अप्रस्तुतप्रसङ्गः, आशुकाव्यम् तथा काव्यवाचनम् इत्यादीनां विविधविधीनां प्रदर्शनं कृतम्।विभिन्नैः प्रच्छकैः प्रदत्तानां प्रश्नानां, पदानां, सङ्ख्यानां तथा अन्येषां निर्देशानां क्रमं स्मृत्वा अवधानिना तेषां समाधानं यथाक्रमं प्रस्तुतम्। विशेषतः समस्यापूरणम्, सङ्ख्याबन्धः तथा आशुकाव्यम् उपस्थितानां विशेषं ध्यानम् आकृष्टवन्ति।

अवधानस्य प्रदर्शनकाले एकस्मिन् समये विभिन्नेषु विषयेषु ध्यानं स्थापयित्वा तेषां स्मरणं कृत्वा पुनः यथाक्रमं उत्तरप्रदानस्य प्रक्रिया उपस्थितानां कृते अत्यन्तं रोचकः अनुभवः अभवत्। छात्रैः शोधार्थिभिश्च अवधानकलायाः एतादृशं प्रत्यक्षप्रदर्शनं उत्साहेन दृष्टम्।

कार्यक्रमे आचार्या ऊर्मी नन्दा विश्वासः, कलासङ्कायाध्यक्षा, दिल्लीविश्वविद्यालयस्य; आचार्यः रमेशकुमारपाण्डेयः, कुलपतिः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य; तथा आचार्यः सच्चिदानन्दमिश्रः, सदस्यसचिवः, भारतीयदर्शनानुसन्धानपरिषदः—इत्येते विशिष्टतया समुपस्थिताः आसन्। प्रो. मीरा द्विवेदी, प्रो. ऋषिराजपाठकः, प्रो. बलरामशुक्लः, प्रो. पङ्कजमिश्रः, प्रो. भारतेन्दुपाण्डेयः, प्रो. विमलेशः तथा प्रो. रञ्जनकुमारत्रिपाठी इत्यादयः आचार्याः, विभागस्य शिक्षकाः, शोधार्थिनः च कार्यक्रमे सहभागिनः अभवन्। उपस्थितैः सर्वैः विशिष्टातिथिभिः वरिष्ठैः आचार्यैः च घण्टाशतकस्य अष्टावधानस्य च प्रस्तुत्योः भूरि प्रशंसा कृता। विशेषतः ५५ निमेषेषु ५६ सेकण्ड्-मध्ये १०८ पद्यानां रचना तथा उत्तरभारतस्य प्रथम-अष्टावधानिरूपेण डॉ. ऋषिराजपाठकस्य प्रस्तुतिः एते द्वे अपि कार्यक्रमस्य उल्लेखनीये उपलब्धी अभवताम्। विद्वद्भिः एते प्रयासाः संस्कृतस्य पद्यरचनापरम्परायाः तथा अवधानपरम्परायाः पुनरुत्थानस्य महत्त्वपूर्णं सोपानम् इति वर्णितम्।

कार्यक्रमस्य आयोजनस्य उद्देश्यं संस्कृतस्य पारम्परिकबौद्धिककलानां संरक्षणं तासां च नूतनवंशक्रमेषु प्रसारणम् आसीत्। अनेन कार्यक्रमेन संस्कृतं केवलं प्राचीनग्रन्थानां भाषा न, अपितु सृजनशीलतायाः, स्मरणशक्तेः, त्वरितचिन्तनस्य तथा आशुकाव्यप्रतिभायाः जीवन्तं माध्यमम् अपि अस्ति इति प्रत्यक्षतया प्रदर्शितम्। समग्रतः 'घण्टाशतकम्-अष्टावधानं च' इति कार्यक्रमः संस्कृतस्य प्राचीनबौद्धिकपरम्परायाः आधुनिकविश्वविद्यालयीयपरिवेशे पुनःप्रस्तुतीकरणस्य उल्लेखनीयः प्रयासः अभवत्। डॉ. उमामहेश्वरस्य प्रथमस्य आधिकारिकस्य घण्टाशतकस्य अन्तर्गतं ५५ निमेषेषु ५६ सेकण्ड्-मध्ये १०८ पद्यानां सफलरचना तथा डॉ. ऋषिराजपाठकस्य उत्तरभारतस्य प्रथम-अष्टावधानिरूपेण प्रस्तुतिः इमे द्वे उपलब्धी संस्कृतजगतः कृते विशेषतया स्मरणीये भविष्यतः।



# राष्ट्रपतिपुरस्कारसम्मानितविद्वान् डॉ. रामचन्द्रझाः
## अवदत् – सनातनधर्मस्य मूलम् आधारः संस्कृतग्रन्थाः

### युवानः व्यवहारे संस्कृतम् अङ्गीकुर्वन्तु
### कुलपतिः प्रो. लक्ष्मीनिवसपाण्डेयः

**संस्कृतभारत्याः क्षेत्रमन्त्री प्रो. श्रीप्रकाशपाण्डेयः अवदत् – 'भाषा अस्ति चेत् भाषणम् अस्ति'**

दरभङ्गा ।३१ अगस्त राघव नाथ झा

राष्ट्रपतिपुरस्कारेण सम्मानितः संस्कृतस्य विद्वान् तथा च कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य भूतपूर्वकुलपतिः डॉ. रामचन्द्रझाः अवदत् यत् सनातनधर्मस्य मूलभूताः ग्रन्थाः संस्कृते एव सन्ति। भारतीयसंस्कृतेः परम्परायाश्च संरक्षणाय संवर्धनाय च संस्कृतस्य अध्ययनम् अनिवार्यम् अस्ति। सः श्रावणीपूर्णिमायाः संस्कृतदिवसस्य च महत्त्वं प्रकाशयन् उपाकर्मणः, रक्षाबन्धनस्य, झूलनोत्सवस्य च विशिष्टतां प्रासङ्गिकतां च विस्तरेण स्पष्टीकृतवान्। सः सोमवासरे संस्कृतविश्वविद्यालयस्य 'दरबार हॉल्' इत्यत्र आयोजिते संस्कृतसप्ताहस्य समापनसमारोहे सारस्वतातिथिरूपेण सम्बोधयति स्म।

**युवानः व्यवहारे संस्कृतशब्दानां प्रयोगं कुर्वन्तु**

समारोहस्य अध्यक्षतां कुर्वन् कुलपतिः प्रो. लक्ष्मीनिवसपाण्डेयः युवानः संस्कृतं दैनिकव्यवहारस्य अङ्गं कर्तुम् आहूतवान्। सः अकथयत् यत् युवानः हिन्दी-आङ्ग्लभाषाभ्यां सह संस्कृतशब्दान् अपि प्रयुञ्जीरन्। आधुनिकाभिरुचौ (फैशन) एव सही, यदि संस्कृतशब्दानां प्रयोगस्य प्रारम्भः भविष्यति, तर्हि शनैः शनैः समाजे भाषायाः स्वीकार्यता व्यापकता च संवर्धिष्यते।कुलपतिः अवदत् यत् केवलं दशसु दिनेषु विंशतिहोराणां (२० घण्टानां) प्रशिक्षणेन संस्कृतस्य सम्भाषणं, पठनं, लेखनं च शिक्षितुं शक्यते। संस्कृतदिवसः संस्कृतस्य विकासाय अस्याः सामाजिकस्वीकार्यतायाः संवर्धनाय च सङ्कल्पस्य अवसरः अस्ति।

### भारतीयसंस्कृतेः रक्षणाय संरक्षणाय च संस्कृतस्याध्ययनम् अतीव आवश्यकम्।
### विद्वान् प्रो. श्रीप्रकाशपाण्डेयः अवदत् – भाषा अस्ति चेत् भाषणम् अस्ति

मुख्यातिथिः संस्कृतभारत्याः क्षेत्रमन्त्री विद्वान् च प्रो. श्रीप्रकाशपाण्डेयः अवदत् यत् "भाषा अस्ति चेत् भाषणम् अस्ति।" सः संस्कृतसम्भाषणस्य महत्त्वं संस्कृतभारत्या क्रियमाणानां प्रयासानां च विषये विवृतवान्। सः अकथयत् यत् संस्कृतं कठिनं, निर्जीवं वा कस्यचित् वर्गविशेषस्य भाषा अस्ति, एतादृशानां भ्रान्तानां धारणानां दूरीकरणम् आवश्यकम्। समाजे संस्कृताय निर्मिताः धारणाः परिवर्तनीयाः। शास्त्रचर्चया मन्थनेन च समाजस्य राष्ट्रस्य च उन्नतेः मार्गः प्रशस्तो भवति।

जनसम्पर्काधिकारी (PRO) डॉ. निशिकान्तः न्यवेदयत् यत् समारोहे विदुषां सम्बोधनस्य मुख्यं केन्द्रं संस्कृतस्य स्वीकार्यतां व्यापकतां च वर्धयितुं तथा च विशेषरूपेण युवानः संस्कृतेन सह योजयितुम् आसीत्।

अस्मिन् कार्यक्रमे विशिष्टातिथिः एफ.ए. इन्द्रकुमारः उपस्थितः आसीत्। संकायाध्यक्षः (डीन) प्रो. पुरेन्द्रारिकः स्वागतभाषणम् अकरोत् तथा च कुलसचिवः डॉ. दिनेशझाः धन्यवादज्ञापनं कृतवान्। डॉ. सुधीरकुमारः साप्ताहिकप्रतिवेदनं प्रस्तुतवान्। छात्रः विश्वमोहनझाः वैदिकमङ्गलाचरणम् अकरोत्।

समापनसत्रस्य संयोजकः डॉ. श्यामसुन्दरठाकुरः, मञ्चसञ्चालनं च डॉ. एल. सविता आर्या अकरोत्। आयोजनसमितौ डॉ. सुधीरकुमारः, डॉ. रामसेवकझाः, डॉ. सविता आर्या, डॉ. वरुणकुमारझाः तथा डॉ. श्यामसुन्दरठाकुरः च सक्रियाम् भूमिकां निरवहन्। अस्मिन् समारोहे विश्वविद्यालयस्य बहवः विद्वांसः, शिक्षकाः, छात्र-छात्राश्च उपस्थिताः आसन्।



शिवाबदार विद्यालये संस्कृतोत्सवः



सेहमल विद्यालये संस्कृतोत्सवः



बढाई विद्यालये संस्कृतोत्सवः



## प्रो.प्रदीप्तकुमारनन्दः

## ॥सप्तताण्डवस्तोत्रम्॥

# आनन्दताण्डवम्

जटाटवीगलज्जलं तरङ्गिणीविनिर्गलं
कपर्दमध्यसंस्थितं प्रबालचन्द्रभासितम्।
सुधांशुशीतलद्युतिप्रसन्नमोदमण्डितं
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम्॥1

सन्ध्याताण्डवम्

डमड्डमड्डमड्डमध्वनिप्रबोधगम्भीरं
प्रनृत्यदंघ्रिपङ्कजप्रभाभिरुज्ज्वलीकृतम्।
अनादिनादगम्भीरं प्रपञ्चकालिमाधरं
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम्॥2

कालीताण्डवम्

भुजङ्गराजभूषितं भुजद्वयप्रसारितम्
विरागभक्तिबोधितं विरक्तचित्तसेवितम्।
कपालकालिकाधरं नृभस्मलेपतत्परम्
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम्॥3

त्रिपुरताण्डवम्

मुनीन्द्रवृन्दवन्दितं सुरेन्द्रसिद्धसेवितम्
गणेशषण्मुखार्चितं सनन्दिकालसेवितम्।
भवच्छिदं मदच्छिदं कुदैत्यजीवनोच्छिदं
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम्॥4

गौरीताण्डवम्

सुधातरङ्गसुन्दरप्रवाहशीतलोज्ज्वलम्
पिशाचभूतभैरवैर्ज्वलत्सभासु सत्वरम्।
शिवाशिवाभिरर्जितं श्मशानभूमिमर्ज्जितं
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम् ॥5

संहारताण्डवम्

सपञ्चकृत्यकारणं विनाशपाशदारणं
स्वतन्त्रतत्त्वघोषकं चिदम्बरे सुनर्तकम्।
दिगम्बरं महेश्वरं विराजराजशंकरं
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम्॥6

ऊर्ध्वताण्डवम्

अघोरघोरघर्घरं हिमालयेषु निर्भरं
त्रिपुण्ड्रभस्मशेखरं तदुर्द्ध्वमोहिनीवरं।
प्रसन्नवक्त्रमण्डितं निरोधशक्तिरुर्जितं
नमामि नृत्यताण्डवं शुभङ्करं सुपाटवम्॥7